Shri Raghunatha Temple MSS. Library,
JAMMU

No. २६० / घ

Title प्रतापरुद्रयशोभूषणम्

Author विद्यानाथः

Extent १२६ पत्र Age सं. १८३०

Subject अलङ्कारशास्त्र

नं. २४०८
पुस्तक संख्या-
...
१२५ पत्राणि
...
लिपि

अलंकारप्रबंध

१८२७

प्रापाद्र।

श्रीगणेशाय नमः ॥ श्रीवेंकटेशाय नमः ॥ विद्याकैरवकौमुदीं श्रुतिशिरःसीमंतमुक्तामणिं धाराण्यद्युभुवस्त्रि-
लोकजननीं वंदे गिरां देवतां ॥ यत्पादाब्जनमस्क्रियाः सुकृतिनां सारस्वतप्रक्रियाबीजन्यासभुवो भवंति कविता
नाट्यैकजीवातवः । पूर्वेभ्यो भामहादिभ्यः सादरं विहितांजलिः । वक्ष्ये सम्यगलंकारशास्त्रसर्वस्वसंग्रहं ॥ विरे-
ण चरितार्थोऽभूत्काव्यालंकारसंग्रहः । प्रतापरुद्रदेवस्य कीर्तिर्येन प्रकाश्यते ॥ रसप्रधानाः शब्दार्थाः गुणालंकार-
वृत्तयः । रीतयश्चेयती शास्त्रप्रमेयं काव्यपद्धतिः ॥ यद्यप्यसौ प्रबंधेषु प्राचां साधु निरूपिता । एतस्याः सदृशां किं-
तु नोदाहरणमाहृतं ॥ पुण्यश्लोकस्य चरितमुदाहरणमर्हति । न कश्चिन्नादृशः पूर्वैः प्रबंधाभरणीकृताः प्रबं- रामः

रामायण

धानां प्रबंधृणामपि कीर्तिप्रतिष्ठयोः। मूलं विषयमहत्त्वस्य नेतृगुणानिरूपणं॥ यथा रामायणे रामगुणाव
र्णनेन वाल्मीकिजन्मनो महाप्रतिष्ठाकारणं। महापुरुषगुणावर्णनेन श्रेयस्करी प्रबंधस्थितिः॥ यथा वेदशास्त्र
पुराणादिभिर्हितप्राप्तिरहितनिवृत्तिश्च तथा सदाश्रयात्काव्यादपि। इयान्विशेषः॥ काव्यात्कर्त्तव्यताधीः सर
सा। अन्यत्र तथा न। तथाहि। यद्वेदात्प्रभुसंमितादधिगतं शब्दप्रधानाच्चिरं यच्चार्थप्रवणात्पुराणवचनादिष्टं
सुहृत्संमितात्। कांतासंमितया यया सरसतामापाद्य काव्यश्रिया कर्त्तव्ये कुतुकी बुधो विरचितस्तस्यै स्पृहां कुर्म
हे॥ ततः काव्यं दृष्टादृष्टफलजनकतया बहूपकारकं। तथा चोक्तं काव्यप्रकाशे। काव्यं यशसेऽर्थकृते व्यवहारवि

अ॰क॰

प्र।पाद्ग।

२

दृष्टिवैचित्र्यमत्रये। सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे। प्रसिद्धं चैतन्महाप्रबंधेषु परिवड्डुइ विसर्गेण

घा संसाविइंजइजसो विरं... तिनि गुणाः॥ सुवइ सुपुरुसचरिअं कित्तं जेण ण हरंतिकं वालापाः॥ यत्र पुनरुक्तमच

रितं न निबध्यते तत्परिस्याज्यमेवातन्मूलाचेयं स्मृतिः काव्यालापांश्च वर्जयेदिति। न केवलं काव्यज्ञानस्यायं प

था ४ शास्त्रज्ञानस्यापि महान् लोकादरस्तदाश्रयेण। तथाहि। वैशेषिकादेरीश्वरप्रतिष्ठापकतया जगत्पूज्यता।

महाभारतादीनामपि महापुरुषगुणवर्णनपरतयैव विख्यातिरुपासितत्वं किं बहुना। वेदान्ता अपि ब्रह्मप्रतिपादक

तयैव परमुत्कर्षं यान्ते। अथातो धर्मजिज्ञासेत्युपक्रममारोप्य सूत्रकृता महर्षिणापि पुरुषाश्रितस्य गुणाश्रयस्य ध

रामः

२

र्मस्य छिज्ञासा द्वारा महापुरुषगुणवर्णनमेव शास्त्रप्राणमित्युररीकृतं। ततन्न्यायनिरूपणपरस्यापि प्रबंधराज्ञे
महापुरुषगुणवर्णनं हेमन्तः परमामोदः। ततश्च। प्रतापरुद्रस्य गु■णाननुपुरत्यानाश्रित्य निर्मितः। अलंकारप्रबं
धोयं संतः कर्णोत्सवोस्तु वः॥ काकतीयनरेंद्रस्य यशो वर्णयितुं कृता। विद्यानाथकृतिश्चेयं स्वयं तेन विभूष्यते॥
त्युक्तैव प्रतिपाद्यमानमहिम्ना प्रबंधमहता। तदुक्तं प्राचा भामहेन। उपश्लोक्यस्य माहात्म्याद् उज्वलाः काव्यसं
लोल्ल पद इति· प्रतिपादितं टेन· गुणालंकारचारुत्वयुक्तमप्यधिकोज्वलं। काव्यमाश्रयसंपत्त्या मेरुणेवामरद्रुमः॥ रुद्र
भटेनापि कथितं उदारचरितनिबंधना प्रबंधप्रतिष्ठेति प्रपंचितं साहित्यमीमांसायां नायकगुणाग्रंथिताः सूक्तिस्र

प्रा।पा।रु।
३

त्रः सुकृतिनामाकल्पमाकल्पं नीतिर्दंडिनोक्तं। आदिराजयशोबिंबमादर्शं प्राप्यवाङ्मयं। तेषामसन्निधाने
पि न स्वयं पश्यनश्यति॥ निरूपितं भोजराजेन। कवेरल्यापि वाग्वृत्तिर्विद्वत्कर्णावतंसति। नायकोयदि वर्णितलो
कोत्तरगुणोत्तरः॥ ॥ तत्रैते नायकगुणाः महाकुलीनतौज्वल्यं महाभाग्यमुदारता। तेजस्विता विदग्धत्वं धा
र्मिकत्वादयो गुणाः। पूर्वशास्त्रानुसारेणाकतिचित्कथिताइमे। प्रतापरुद्रदेवस्य गुणावाचामगोचराः॥४॥ अथैषां
लक्षणमुदाहरणं च॥ महाकुलीनता नाम कुले महति संभवः। यथा॥ तादृङ्मध्यमलोकभाग्यविभवानिंद्रा
दिवृंदारकैः क्षोण्यां क्रीडितुमिच्छुभिः स्थिरतरं संप्रार्थितः पद्मभूः। अत्यर्कं ड्डुकुलप्रशस्तिमसृजद्यं काकतीया ।राम।

३

न्वयं तस्मिन्संप्रति वीररुद्रवपुषा जागर्ति लक्ष्मीपतिः अथौज्ज्वल्यं॰ रूपसंपन्नदेहत्वमौज्ज्वल्यं परिकीर्ति-
तं॰ यथा॰ मुरारेर्यः पूर्वं जलनिधिसुतायामुदभवन्महादेवाज्जातः। स पुनरवनीमहेन्द्रदुहितरि। वपुष्मान्कामो
श्री यं जनयति जगती भाग्यविभवः प्रतापरुद्रः स्वयमिति मनीषामगादृशां। अथ महाभाग्यं॰ विश्वंभराधिपत्यं
यत्तन्महाभाग्यमुच्यते॰ यथा॰ सेवानम्रनरेन्द्रमौलिविलसद्रत्नप्रभाभासुरं राज्यश्रीप्रथमावतारपदवीमास-
न्नसिंहासनं। क्षोणीं रक्षति विक्रमैरनुपमैः प्रत्यर्थिपृथ्वीपतिश्लाघालंघनजांघिकै गुणनिधिः श्रीवीररु-
द्रो नृपः अथौदार्यं। यद्दिश्राणनताच्छील्यमौदार्यं तन्निगद्यते॰ यथा॰ वदान्यो नान्योस्ति त्रिजगति समो

प्रा·पा·अ·
४
५

रुद्रनृपतेर्गुणश्रेणीश्लाघापिहितहरिदीशानयत्रासः ॥४॥ समंतादुद्धूतै र्द्विरदमदगंधैः सुरभयः क्रियंते य
द्दिक्कुञ्जनमत्तागहप्रांगणा ॥ रामसुवः ॥ अथ तेजस्विता· उगमप्रकाशकत्वं यत्तेजस्वित्वं तदुच्यते· यथा· सदा तेजोमा
नोस्फुरति जयिनः काकतिविभोररिक्ष्माभृत्क्रांता चिकुरति सिराहं क्वतिभुवि । प्रकाशो व्युत्पत्तिर्भवति जरदुद्दाम
तमसामसूर्यंपड्यानामवधिगिरिपार्श्वात्प्रद्दपदां । अथ विदग्धता· कल्पवस्तुषु चातुर्यं वैदग्ध्यं परिकीर्त्यते·
यथा· चातुर्यं किमु वर्ण्यते गुणनिधेः श्रीवीररुद्रप्रभोर्यत्रान्योन्यविरुद्धयोरपि महद्वात्सीप्रियोरार्जवं ॥
किं चास्यां सहशोपचारललितां नत्वा दृशौ रुत्सवैर्निः सापत्न्यमिमां भुवं स्म नृपतिर्धत्ते दिशां तिल्वरः ॥ अ राम
४

ष धार्मिकत्वं। धर्मैकायत्तवृत्तित्वं धार्मिकत्वमुदीर्यते। यथा। परिहासेष्वनौचित्यं स्वप्नेष्वन्यवधूकथा ४
शत्रोरप्यगुणारोपका कंतीद्रोन मृष्यति। आदिग्रहणान्महामहिमत्वपांडित्यादयः ४। तन्महामहिमत्वं
स्याद्यत्पुनर्दैवता। स्मृता। यथा। कौसल्यासीत्प्रथमजननी देवकी च द्वितीया विश्वोर्माता तदनुमहिता मुग्ध
दुंमातृतीया ॥ यस्त्रेतावा रघुपतिरभूद्द्वापरे शौरिरासीत्त्वं क्षोणीमसजयति कलौ वीररुद्रावतार ४॥ आ
त्मगतरुद्रध्वजात्मकतया महामहिमतोक्ता ॥ सर्वविद्याधिकत्वं यत्पांडित्यं तदुदाहृतं। यथा। गोष्ठीभिः परितो
षयन्बुधगणान्स्वउद्दर्शनी सीमतिः सत्सारस्वतसक्तिदर्शनचतुरो ४ सक्तेः कवीन्प्रीणयन्। संगीतोपनि

प्र·ना·रु·

प्र॥ प्रा॥ द्रा॥ ५

5

षड्गुणस्य विज्ञुनेरातो ग्रयोग्यक्रमैर्धिन्वन्सं सदैवेति कान् विहरते श्रीकाकतीन्द्रो नृप ॥ अथ नायक
गुणनिरूपणानंतरं नायकस्वरूपं निरूप्यते । यशः प्रतापसुभगो धर्मकामार्थतत्परः ॥ धुरंधरो गुणा दय
श्च नायकः परिकीर्तितः ॥ यशःप्रतापाभ्यां सुभगत्वं यथा । धर्मालंबसमुच्छ्रितां त्रिभुवनस्यैकातपत्रश्रियं धत्ते
काकतिवीररुद्रनृपतेः स्फारं यशोमंडलं । छायेवास्य नभस्थली कुवलयश्यामेयमालक्ष्यते तन्मन्ये नियतं
प्रतापतपनस्तस्योपरि द्योतते ॥ धर्मकामार्थतत्परत्वं यथा । धर्मोर्थ इव पूर्णश्रीरर्थो धर्म इव स्थितः ॥ काम
स्ताविव तौ काम इव रुद्रनरेश्वरे ॥ धुरंधरत्वं यथा । गायंतीरनुमोदते निजवधूः शेषः शिरः कंपते लक्ष्मी

राम

५

श्रीरायते घ्नकच्छपपतिर्वक्षस्स्थलीदर्शनात् दिङ्नागाश्च करेणुकाश्रुचमपाकुर्वन्त्यनुव्रज्यया दोष्मा काकुत्स्थवी
ररुद्र नृपतौ विश्वंभरां बिभ्रति॥ गुणत्रयत्वं यथा। मुखैः सहस्रेण फणीव दैत्यो करैः ४ सहस्रेण लिखेद्दिवस्वा
न्नेत्रैः ४ सहस्रेण हरिश्च पश्येत् तस्यान्नगुणान्का कति वंशमनु ४॥ अथ नायकविशेषा निरूप्यन्ते। उदात्त उद्
धतश्चैव ललितश्शान्त ४ इत्यपि॥ धीरपूर्वा इमे पूर्वे चत्वारो नायकाः स्मृताः। सर्वरससाधारणाश्च चत्वारो नाय
काः। धीरोदात्त धीरोद्धत धीरललित धीरशान्ता इति। तेषां स्वरूपमुदाहरणं च। महासत्त्वोऽतिगंभीरः कृपावान
विकत्थनः प्रतापरुद्रवद्धीरो धीरोदात्तः स संमतः ४। संदिग्धे कृपयामदुः ४ क्षमामरीन्हंतुं धृतासिः पुरः शौर्य

श्री प्रताय प्रशंसिषु नमद्भूर्लज्जते वंदिषु ॥ नाकारान्सुखरोपहर्षविज्ञुनान्वैता धत्ते मनाक् त्रैलोक्यातिशा[illegible]स्त्रे
या लुकीर्तिसुभगः श्रीवीररुद्रोन्नृपः ॥ दर्पमात्सर्यमूयिष्ठश्चंडवृत्तिर्विकत्थनः यायावी सुलभक्रोधः स धी
रोद्धत उच्यते ॥ यथा रेरे गुर्जरजर्जरोसि समरे कंपाल किं कंपसे वंग त्वं गसि किं मुधा बलरजः कालोसि किं कौ
कणा ॥ हूणाः प्राणपरायणो भव महाराष्ट्रापराष्ट्रोस्यमी यो द्वारो वयमित्यरीनभिभवंत्यांध्रक्ष्मामरुद्भूरुगः ॥४॥ अत्र
भटानां धीरोद्धतत्वं निश्चिंतो धीरललितः ४ कलासक्तः ४ सुखैकसहः ४ यथा । शौर्यैष्माणिरवगाहः प्रतिनृपः सर्वे सुखीमृदुः
पि नम्रीकृताः पाति प्रत्यमुपैति भूरियमयं नाथः स्वयं भूः शिवः ॥ धीरोपयुवराज एव वहति श्रीवीररुद्रो धुरं सर्वां

मित्यत्तुमोऽस्तेप्रतिकल्पंश्रीकाकतीन्द्रो विभुः॥ धीरः शान्तः प्रसन्नात्मा धीरशान्तो यथा॰ वीररुद्रनृपालर हिजारिकः॥
त्नमसितः प्राप्तोद्वयंमोदं नेसंख्यावक्षणएवप्रथम। मिवप्रत्यग्रमल्लाकरः उन्मीलत्कमला विहारवसतिर्म
त्वा विकासे निजे विश्वामोदंमुदंचयन्न विरतं दोषावसानोत्सुकः अत्रविप्राणांधीरशान्तत्वं॥ ॥अथशृंगारविषया
श्चत्वारोनायकाः॥ अनुकूलो दक्षिणश्चधृष्टः शठ इति स्मृतः एषांस्वरूपमुदाहरणंच॰ एकायत्तोनुकूलः स्यात्
एकस्यांनायिकायां विशेषानुरक्तोनुकूलोनायकः यथा॰ किंनामाचरितंतपः सखिमुर्वेयस्याः पतिर्गीयते वीरोरुद्र
नृपः कृतंतुचरितंतस्यप्रियाख्यायतः जानेमानिनि माविषीदपुरतः प्रख्याप्यनामस्थिरं त्वांरत्नाकरमेखलांत्व

७ यिसदासक्तं विधास्येनृपं॥ अत्र प्रतापरुद्रस्य क्षोण्यां विज्ञेयवाक्यागो व्यड्यते येन वध्वास्थिरारत्नाकरमेख
ले ति॰ तन्नामग्रहणेन स्नेहप्रख्यापनं क्रियते॰ तुल्यो नेकत्रदक्षिणः॥४॥ अनेकासु नायिकासु अत्रैव समयेणास्नेहा
नुवर्ती दक्षिणः॥ नर्मोक्तेन निमंत्रितास्मरकलाकेलीषु काचिन्मयासाकूतेन विलोकनेन हृदयं कस्याश्चिदाविष्कृ
तं॥ कस्याश्चित्सहितः प्रसाधनविधिर्दूतीकरेण क्कवागच्छामीत्यनुचिंतयैव नृपतेरासीत्समाप्ता निशा॥ तथा
च॰ वातीमुखेन नेत्रास्यां श्रियं दोक्ष्णा च मेदिनी। मानयंस्तुल्यतां धत्ते तासु रुद्रनरेश्वरः॥ व्यक्तापराधो गतभीः स
धृष्टइति॰ कथ्यते॰ यथा॰ राज्यश्रीपरिभोगशंसिभवतः सर्वांगमालोक्यते कस्तत्रा विनयोस्ति साहसमिदं त ७

न्नाममयर्पितं॰ जाने त्वां बहुवल्लभं किमपरं वक्तव्यमस्त्यावयं तस्यां प्रेम न तवाधिकं वसुमती या नाम किं जल्पितैः
गृहं विप्रियकृच्छठ ४। नायिकामात्रविदितविप्रियकारी शठः यथा— दृष्ट्वा पश्यसि केवलं न मनसा वाचा प्रियं
भाषसे नो भावेन मुखान्तरं प्रकटयस्यग्रे न चाभ्यन्तरं ॥ ज्ञातं काकतिनाथमस्तव परं प्राणेश्वरी ध्यायते मादृक्षे
षु विडंबनैव तद्दलं व्यर्थैर्बहिः संभ्रमैः अत्र तत्तन्नायकविशेषणतया काकतीश्वराणामुदाहरणो न वीररुद्रस्यै
व वर्णनं॰ एषां नायिकानुकूलने पीठमर्दविटचेटविदूषकाः सहायाः किंचिदूनः पीठमर्द एक विद्यो विट ४
स्मृत ४। संधानकुशलश्चेटो हास्यप्रायो विदूषकः स्पष्टमेषामुदाहरणं ॥ अथाष्टविध शृंगारनायिका ८ स्वाधी

नपतिकाचैव तथा वासकसज्जिका ॥ विरहोत्कंठिता चैव विप्रलब्धा च खंडिता ॥ कलहांतरिता चैव तथा
प्रोषितभर्तृका । तथाभिसारिका चेति क्रमाल्लक्षणमुच्यते ॥ प्रियोपलालिता नित्यं स्वाधीनपतिका मता · य
था · प्रियां सर्वंसहां तैस्तैर्विशेषैरुपलालयन् · प्रतापरुद्रनृपतिः प्रतिक्षणमवेक्षते ॥ प्रियागमनवेलायां
मंडयंती मुहुर्मुहुः केलीगृहं तथात्मानं सा स्याद्वासकसज्जिका ॥ यथा · स्वतेजसा परिष्कृत्य प्रधानागारमु
त्कया । श्रियाभिषेकवेलायां वीररुद्रः प्रतीक्षितः · चिरयत्यव्यलीकेपि विरहोत्कंठितोन्मना ॥ यथा नशंका
न्याताद्दृग्गुणापरिमलेरुद्रनृपतौ कया वा गोष्ठासो चिरयति सखीभिर्नसुलभः समाने तुं कांते व्रजमदन

बद्धोंजलिरयंयतो विष्वद्ध्रीच ४। किरति किररागांस्त्व त्प्रियसरव ४। क्वचित्संकेतमावेद्य दयितेनागतेवं चिंता॥ सम
रार्त्ताविप्रलब्धेति कलाविद्भिः ४ प्रकीर्त्यते॥ यथा॰ गछाग्रे सखिका प्रिया गमकथा प्राप्तो निशीथः परं संकेतालय
यमोक्ष्यसे मम मुधा जातोश्रुभिः पंकिलः यद्दारु द्रू नरेश्वरे प्रियतमे राज्यश्रियो वल्लभे भारत्या ४ क्षितिनायके क्व
तपदाः प्रायोवयवं चिंता:॥ नीत्वान्यत्र निशां प्रातरागते प्राणवल्लभे। अन्यासंभोगचिह्नैस्तु कुपिता खंडिता म
ता॥ यथा॰ रात्रिर्यामत्रयपरिमिता वल्लभास्त्वेसहस्त्रं मार्गासत्क्या मम गृहमपि प्राप्तनेरे वागतोसि॥ किं कर्त्तव्यं व
दनपतिभिः प्रेक्षणीयाहि सर्वाः को वा दोषस्तव पुनरहं कामममायासयित्रीं रोषा[illegible] पंचराग्नुद्यपश्चात्तापसम

न्विता॥ कलहांतरिता नाम सरिभिः परिकीर्त्यते। यथा तहा तदा अणुणं तो वि ओ तुए हि अअरोसकलुसे
ण। अवहीरिओ णमुत्तिओ राए त्ति विअहवे अरांसहसु॥ तदा तथा अनुनयन्प्रियस्त्वया हृदयरोषकलुषेण
अवधीरितानतो तो राज्ञेति वियोगवेदनां सहस्व॥ देशांतरं गते कांते खिन्ना प्रोषितभर्तृका। यथा। क्वप्र(थ)मान त्रैलो
कीर्तिमहतः श्रीवीररुद्रप्रभोः सेवार्थं चिरयत्सु काकतिपुरे म्हपेषुतघोषितः द्वारासक्तदृशो नयंति दिवसा।
मुग्धाक्षा याचक्षपास्तद्ध्यानप्रतिबद्धसांद्रपुलकव्याकीर्णकामेषवः कांताभिरणोद्युक्ता स्मरार्त्ता साभिसारिका स
यथा। संभ्रमैरलमत्यन्तं प्रेयानस्तु महीपतिः करेणुस्कंधानपश्यामि नश्च लोमया भिसारिकां। आसां नायका॥

१

नुकूलनेसहाया ८। दूत्योदासीसखीकारुधात्रेयीप्रातिवेशिनीलिंगिनीशिल्पिनीस्वाचसहायाः परिकीर्त्तिताः
एतासांस्वरूपमुदाहरणांचस्पष्टं· कामशास्त्रप्रसिद्धाः [redacted] पद्मिनीचित्रिणीप्रमतयो जातिविशेषाः
संक्षेपेण नायिका त्रिधा· मुग्धामध्याप्रगल्भाचेति· उदयद्यौवनामुग्धालज्जापिहितमन्मथा। लज्जामन्म
थमध्यस्थामध्यमोदितयौवना· स्मरमंदीकृतव्रीडाप्रौढासंपूर्णयौवना॥ यथाक्रममुदाहरणानि· मुग्धेय
न्मनसोपिगोप्यमखिलंतन्मयामावेद्यते किंयाकाचिदहंतवप्रियसखीप्रछाघ किंताम्यसि॥ आसक्तिस्त
ल्यां ववीररुद्धनृपतावाज्ञास्यजे किंभवेदित्यां प्रणयैकवाचिस्मुतनुदृष्टोतराल [redacted] ज्जया॥ मध्यमायथा· ली

१० लाविभ्रमपर्वरंगमुदितं तारुण्यमेत्यत्र पानेपथ्यांतरबिंबितस्मरकलालास्यप्रपंचश्रियः सख्य ४ पश्यत
काकतीयनृपतौ भावानुबंधोज्ज्वलः कोप्यस्यास्तरलभ्रुवो विजयते शृंगारनाट्यक्रमः॥ प्रौढायथा॰ सहेलंप
ण्यंत्या ४ प्रकृतिसुभगं रुद्रनृपतिं तदात्वप्रस्तुत्य द्विविधललिता दीपमधुरं। रसप्रादुर्भावा युगपदुदयल्ला
ल्लिकमहोत्सवगाढ्यास्ताः स्वरूपे कुसुमशरशिल्पं विजयते॥ भेदांतरं यथासंभवमुदाहार्यं। गुणालंकाराणां
रसमहति काव्ये विलसितं स्फुरच्छब्दार्थाभ्यां तदपि हृदयानंदि भवति। तयोरप्युन्मेषः स्त्रवदमृतमाधुर्यसुभ
गः परं पुण्यं श्लोकं चरितमनुबध्नन्विजयते॥ ६५॥ इति विद्यानाथकृतौ प्रतापरुद्रयशोभूषणालंकारे ना १०

॥ अथ ॥

यिका नायक प्रकरणं ॥ ॥ गुणालंकारसहितौ शब्दार्थौ दोषवर्जितौ ॥ गद्यपद्योभयमयं काव्यं काव्यविदो
विदुः ॥ अदोषौ सगुणौ सालंकारौ शब्दार्थौ काव्यमिति काव्यसामान्यलक्षणं ॥ शब्दार्थौ मूर्तिराख्यातौ जीवितं व्यं
ग्यवैभवं । हारादिवदलंकारास्तत्र स्युरुपमादयः ॥ श्लेषादयो गुणास्तत्र शौर्यादय इव स्थिताः ॥ आत्मोत्क
र्षावहास्तत्र स्वभावा इव रीतयः । शोभामाहार्यकीं प्राप्ता वृत्तयो वृत्तयो यथा । पदानुगुण्यविश्रांतिः शय्या श
य्येव संमता । रसास्वादप्रभेदाः स्युः पाकाः पाका इव स्थिताः ॥ प्रख्याता लोकवदियं सामग्री काव्यसंपदः ॥
वाचकत्वलक्षकत्वव्यंजकत्वेन त्रिविधं शब्दजातं । वाच्यलक्ष्यव्यंग्यत्वेनार्थजातमपि त्रिविधं । तात्पर्यार्थोपि व्यंग्या

संबंधांतरनिबंधना चेति द्विविधा लक्षणा संबंधांतरानिबंधना जहद्वाच्याऽ
पर्य्येवनपुनः पृथगभूत॥ अभिधा लक्षणा व्यंजना ख्यास्तिस्रो वृत्तयः॥ गौणा वृत्तिर्लक्षणा प्रभेद एव· संबंधा
नुपपत्तिमूलत्वात्· यथाग्निर्माणवक इत्यत्र सादृश्य विशिष्टमाणवक प्रतिपत्तिर्विवक्षिता तथैव गंगायां घो
ष इत्यत्र गंगासंबंध विशिष्ट तीर प्रतिपत्तिर्विवक्षिता· गंगासंबंधस्योपलक्षकत्वे घोषगतपवित्रत्वाद्यसि
द्धेः· अत एव सादृश्य निबंधनाऽजहद्वाच्या चेति सादृश्य निबंधना सारोपा साध्यवसाया चेति· एवं लक्षणा च
तुर्विधा· कैशिक्यारभटीसात्वतीभारतीच रचना श्रितत्वेन रसावस्थाऽसूचकाः तथोक्तं दशरूपके कैशिक्या न
रभटी चैव सात्वती भारती तथा॥ वृत्तस्तो वृत्तयो ज्ञेया रसावस्थान सूचकाः रचनायामपि रसव्यंजकत्वं प्र॥

सिद्धं · रसाननुगुणवर्णरचनाया दोषत्वमुक्तं वैदर्भीप्रभृतयो रीतिविशेषा न वृत्तिष्वंतर्भूताः अत्र संकेतिता
र्थगोचरः शाब्दव्यापारोभिधा · सा द्विविधा रूढिपूर्विका योगपूर्विका चेति · तत्र रूढिर्यथा · तपोविशेषैः प्रधि
तैः प्रजानां शुभैश्चरित्रैर्जगतीमहिष्याः भाग्यैः प्रभूतैर्भुवनस्य चास्य बिभर्ति राज्यं वरवीररुद्रः · अत्र सर्वे
त्रा ह्यारूढाः योगपूर्विका यथा · राज्ञि रुद्रनराधीशे रंजयत्यखिलाः प्रजाः भूरत्नवर्षा वसुमती रत्नगर्भास्थि
रेति च ॥ अत्र रत्नगर्भा वसुमतीत्येवमादयो यौगिकाः वाच्यार्थानुपपत्त्या तत्संबंधिन्यारोपितः शाब्दव्यापा
रो लक्षणा · तत्र जहल्लक्षणा यथा · जंतुः काकतिभूमनुराकर्ण्य परहध्वनिं सामंतनगराण्युच्चैराक्रोशंति समंततः

१२ 12

अत्र नगराण्याक्रोशंतीतिव्याधिस्यान्वयः अचेतनानामाक्रोशासंभवात्· अजहल्लक्षणा यथा । पातु वः काकति
नाथस्य पादपीठीमनारतं । स्फुरद्रत्नप्रभाजालैरलंकुर्वंति मौलयः अत्रालंकरणासिध्यर्थं मौलिभिराश्रयभू
तान्नृपाल लक्ष्यंते· सारोपा लक्षणा यथा· मंथानाचलमूर्ध्नि चक्रशिलासंघटनश्यामिकाकारं यत्तु हिनघुतौ स्फु
रति तत्सारंगमाचक्षते । मन्येन त्विह वीररुद्रनृपतेः कीर्तिश्रियानिर्जितस्तन्मुद्रांकवराहमिंदुरुरसा बिभ्रत्स
मुज्जृंभते ॥ अत्र चंद्रस्य कलंकरूपकुरंगे वराहत्वमारोप्यते· विषयविषयिणोरभिहितयोरभेदप्रतिपत्तिरारोपः
विषयनिगरणेन भेदप्रतिपत्तिरध्यवसायः साध्यवसायलक्षणा यथा· काकतीयकुलांभोधेः प्रभवत्येष चंद्रमाः

कृतः कुवलयोल्लासो येनोदयमुपेयुषा ॥ अत्र प्रतापरुद्रश्चन्द्रतयाध्यवसीयते· काकतीयकुलाम्भोधेरित्यत्रारो
पः· अथ व्यंजनावृत्तिः अन्वितेषु पदार्थेषु वाक्यार्थोपस्कारार्थमर्थान्तरविषयः शब्दव्यापारो व्यंजना वृत्तिः सा त्रिविधा
शब्दार्थोभयशक्तिमूलत्वेन· तत्र शब्दशक्तिमूला यथा वाहिन्यः काकतीन्द्रस्य सर्वतोमुखसंभ्रमाः कुर्वत्युग्रक
बंधाढ्यं प्रतिपक्षबलात्ययं· अत्र वाहिनी सर्वतोमुखकबंधशब्दानामर्थप्रकरणादिना सैन्यसर्वव्यापित्वलूनम
स्तकदेहपराणां वाचकत्वे नियंत्रितेपि शब्दशक्तिमूला नदीजलप्रतिपत्तिर्जायते· सा व्यंजनावृत्तिः प्राकरणिका
अ र्थपर्यवसिताभिधानशक्तौत्वप्राकरणिकार्थप्रतिपत्तिं कर्तुं प्राकरणिकार्थस्यापि वाक्यार्थशोभार्थं वक्तुर्विवक्षित

त्वात् तदन्यतस्तत्प्रतीतेः व्यंजनाख्यं व्यापारान्तरं शब्दस्यैव कल्प्यते · नात्र लक्षणा संभवति वाच्यानुपपत्त्यभा
वात्· नात्र व्यापारद्वयेनार्थप्रतिपादने वाक्यभेदः प्रयोक्तृविवक्षापरतंत्रत्वाल्लौकिकवाक्यानां । अर्थशक्तिमू
लाव्यंजना यथा । श्रुत्वाकान्तिमहमतुः क्षोणीपातिग्रहोत्सवं । अंगुष्ठेनालिखन्भूपाः पादपीठीं न जान
नाः अत्र भूपा विपक्षा इत्यर्थशक्त्याभिव्यज्यते । न चार्थशक्तिमूलव्यंजनेऽनुमानशंका । व्यंग्यव्यंजकयोरवि
नाभावाभावात् । म्लानाननत्वादिकार्यस्यानेककारणकत्वान्नियतकारणप्रतिपत्तिर्विवक्षानुगृहीताच्छ
ब्दादेव । किंच । एकस्मादेव व्यंजकात्तत्प्रतिपत्तुर्विवक्षानुसारेणानेकव्यंग्यार्थप्रतिपत्तिरनुमानपरिपाटीवि

रूढा। न चाभिधावृत्तिः संकेतितार्थ एव तस्याः परिचय इती गमनिका। उभयशक्तिमूला यथा। विजि-
तारिपुरो महन्तौ विलसत्सर्वमंगलः॥ राजमौलिरसौ भाति रुद्रदेवो जगत्पतिः॥ अत्र विजितारिपुर इत्यर्थश-
क्तिमूलत्वं विलसत्सर्वमंगलः राजमौलिरिति शब्दशक्तिमूलत्वं इत्युभयशक्तिमूलः प्रतापरुद्रशंकरयोरु-
पमालंकारध्वनिः। अथ कैशिक्यादीनां स्वरूपं निरूप्यते। तत्रात्यर्थसुकुमारार्थसंदर्भा कैशिकी मता। अत्यु-
द्धतार्थसंदर्भा वृत्तिरारभटी मता॥ ईषन्मृद्वर्थसंदर्भा भारती वृत्तिरिष्यते। ईषत्प्रौढार्थसंदर्भा सात्वती वृत्तिरि-
ष्यते। तत्र। अत्यंतसुकुमारौ द्वौ शृंगारकरुणौ मतौ। अत्युद्धतरसौ रौद्रवीभत्सौ परिकीर्तितौ॥ हास्यशांताद्भु-

ताः किंचित्सुकुमाराः प्रकीर्तिताः ईषत्प्रौढौ समाख्यातौ रसौ वीरभयानकौ यत्र शृंगारकरुणावतिकोमले
न संदर्भेण वर्ण्येते तत्र कैशिकी· यत्र रौद्रबीभत्सावतिप्रौढेन संदर्भेण प्रतिपाद्येते तत्रारभटी· यत्र नातिसु
कुमारा हास्यशांताद्भुतरसा नातिसुकुमारेण संदर्भेण प्रतिपाद्यंते तत्र भारती· यत्र नातिप्रौढौ वीरभयानकौ ना
तिप्रौढेन संदर्भेण प्रतिपाद्येते तत्र सात्वती· कैशिकी यथा· जितमदनविलासं काकतीयान्वयेंदुं नरपतिमनिमे
षं द्रष्टुमाशंसिनीनां। सपदि विरचितासीदंगनानामपांगैर्दिं विकुवलयदामश्यामला तोरणश्रीः· त्र्यारभटी
यथा· खड्गाघातनिकृत्तशात्रवशिरोनिष्ठ्यूतरक्तच्छटाड्वालैरुद्भटशास्त्रसंघट्टनभवत्स्फारस्फुलिंगोत्करैः। सव्या

१४

ग्नासृक् · पिशितास्थिखंडविकटे स्थूलोल्बलांगारकैः रक्षं उच्छलमविगंड नपत्नेः क्रोधाग्निरायोधने ॥
भारतीयथा · श्रोत्रान्नलंमह द्न्यदेवमहिनः कोप्येषगंभीरिमा काप्यन्या सरसिः प्रतापयशसोरन्यैव वाहो: प्र
था · सर्वंनतननमेवरुद्रन्नपनेर्ज्ञानेनतन्निर्मितो सामग्रीचतुरानने न क्रियती कीदृ क्रमा कल्पिता ॥ सात्वतीय
था · दूरादाकार्य विश्वप्रसरयशसो वीररुद्रस्य जैत्रप्रस्थानारंभभेरी तिनदमरिनृपाः शराकिर्णा ज्वराजी: ।
आरुह्याद्रीन्विदग्धा गहनमपि महत्कंटकाबद्धकेशाः पायध्वं मुंचजेति प्रतिनृपतिधियापादपान् प्रार्थयंते ॥
मध्यमारभटीत्यन्यात यामध्यमकैशिकी ॥ वृत्तीइमे उभे सर्वरससाधारणे मतेमदूर्थैव्यनतिप्रौढबंधा मध्यम

प्र·र·

९५

15

कैशिकी॥ शृंगारकरुणयोरतिसुकुमारयोरत्यप्रौढसंदर्भेनिदुष्यति किंत्वतिप्रौढसंदर्भेनिष्यते· प्रति
कूलवर्णरूपदोषापत्तेः मध्यमारभटी प्रौढेप्यर्थेनातिमृदुक्रमा· अतिप्रौढयोरपि रौद्रवीभत्सयोरीषन्मृदु
बंधोनदुष्यति· अतिमृदुसंदर्भस्तु विरुद्धः मध्यमकैशिकी यथा· आसन्नेपि महोत्सवे कथमिति तस्य त्वत्प्र
वासं व्रजेर्धिग् धिक्त्वां हसमावयोर्विघटनं कोवा विधिः कांक्षते। इत्थं स्वप्ननिवारितप्रियतमप्रस्थानबुद्धि
स्ततो बुध्वा मूर्छति काकनीयनृपजेत्वहैरिनारीजनः मध्यमारभटी यथा· मांसकी[illegible]कसंकीर्णाः प्रसरद्रुधि स २
रापगाः वसाकर्दमिता युद्धभुवो भ्रमसुभटैः कृताः एवं रसांतारेष्वप्युदाहरणं द्रष्टव्यं· वैदर्भ्यादि[illegible]रीतीनां श्रा

९५

द्गुणाश्रितानामर्थविशेषनिरपेक्षतया केवलसंदर्भसौकुमार्यप्रौढत्वमात्रविषयत्वात्कैश्चिद्वृत्त्यादिभ्यो भे
दः पदसंदर्भस्यातिमृदुत्वमसंयुक्तकोमलवर्णबंधत्वं· अतिप्रौढत्वं परुषवर्णविकटबंधत्वं· संयुक्तमृदुवर्णै
र्व्वीषन्मृदुत्वं· अविकटबंधपरुषवर्णैर्व्वीषत्प्रौढत्वं॥ ॥अथ रीतीनां स्वरूपमुदाहरणं च· रीतिर्नाम गुणाश्लि
ष्टपदसंदर्भजातिता॥ सा त्रिधा· वैदर्भी गौडी पांचाली चेति· बंधपारुष्यरहिता शब्दकाठिन्यवर्जिता॥ नाति
दीर्घसमासा सा च वैदर्भी रीतिरिष्यते· यथा· काकतीयनरेंद्रस्य कीर्तिचंदनचर्चिताः दिगंगना वितन्वंति वतंसी
कृतत्तद्गुणाः· यथार्थविजयस्य गुणलीलाजितो विनाशेषलोके विभवजितनरनाथैः काकतीयान्वयेंद्रः॥ सु

रत्नरुगगणानायां कामधेनुप्रसंगोह्यितिसुरजननेयं वीतकौतूहलासीत्॥ ओजः कांतिगुणोपेता
गौडीयारीतिरिष्यते॥ यथा॥ प्रचंडतरदोर्दंडखंडितारातिमंडलः। विमर्दुर्वैधुरांगुर्वीप्रभवत्त्वंप्रभूपतिः
यथा च॥ उद्यद्दोस्तंभरखड्गचुटद्दरिमकुटाटोपसंजातरागुष्मांतिम्यव्वपत्यन्तगामयकररणाचणस्फारनासी
ररेणुः आंध्रक्ष्मामनुजैरासीद्दधिकररणाधुराभिन्नमत्तेभकुंभप्रोद्यन्मुक्तौघताराणि करपरिवृतः सर्वधर
वक्रचंद्रः पांचालरीति वैदर्भगौडरीत्युभयात्मिका। यथा जेतुः काकतिवीररुद्रनृपतेर्जैत्रप्रयाणोत्थिते ते
क्षोणीरेणुभरेण नभः स्पृशि भ्रश्यांभः विभ्रमं विभ्रति। ज्ञाता मर्त्यनदी विशं कटजटी दीर्घाविय दृग्घिका गा

दं गरुडतमाचगौतमनदीपानालगंगा यजे॥ यथाच· स्वच्छानेतच्छलुमर्जिगंडुन्नपनेत्व त्वद्भुभोगीद्विपस्ना
तोर्यंत्सरितोपमेतिसततं किं लेजदत्वद्भुते· पीतेन प्रतिपक्षपार्थिवयशः क्षीरेण गौरत्विषयत्संवर्ध्य य
ति त्रिलोकमरितां त्वत्कीर्तिलक्ष्मीसुधां॥ अपयशव्या॰ यावदानांपरान्योन्यमैत्री त्वाख्येति कथ्यते। यथा· दामुः
का कतिवंशमंडनमणे र्निःसीम विश्राणन श्लाघालंघितकल्पपादपगुणा प्रौढेरणा धौतसः बिंबच्छारदं
कौमुदीपरिमलं सामंतसीमंतिनी गंडाभोगनिरूढपांडिमधुरां धत्तेयशः प्रायशः॥ अत्रपदविनिमयास
हिष्णुत्वाद्बंधस्य पदानुगुणपरूपाशय्या॥ अथपाकः· अर्थगंभीरिमापाकः स द्विधा हृदयंगमः द्राक्षापा

१८ कोनारिकेलपाकश्चत्रस्फुटांतरौ ॥ द्राक्षापाकः स कथितो बहिरंतःस्फुरद्रसः यथा· स्मरस्मेराननं दस्मि
तमधुरसौभाग्यसुभगान्नेनाग्व्रीडाजाड्यान्प्रणयरसकल्लोलभरितान्वे· ह्नतानेकस्कंधान्मनसिजसहस्रा
णिस्तुवतः कटाक्षान्वामाक्षी किरति परितो रुद्रनृपतिं ॥ स नालिकेरपाकः स्यादंतर्गूढरसोदयः यथा· लीला
रं विभ्रमपूर्वगमित्यादि· अत्र न द्रागर्थप्रतीतिः ४० एवं वस्त्वलंकारप्रतीतावपि द्रष्टव्यं· पाकांतराणि यथासंभव
मूह्यानि ॥ अथ काव्यविशेषाः ४। व्यंगस्य प्राधान्याप्राधान्याभ्यामस्फुटत्वेन त्रिविधं काव्यं· व्यंग्यस्य प्राधा
न्ये उत्तमं काव्यं ध्वनिरिति व्यपदिश्यते· अप्राधान्ये मध्यमगुणीभूतव्यंग्यमिति गीयते· व्यंग्यस्यास्फुटत्वेऽध

मकाव्यं चित्रमितिगीयते॰ ध्वनिर्यथा॰ स्वामिन्गोत्रमहीधरान्किमधुनानीचैर्विधत्से कुतोगाधानंबुनिधीन्क
रोषि कुरुषे किं दिक्पतीनल्पकान्॰ इत्थंपार्श्वचरानुलापमखिलंन्यक्कृत्य धर्मैर्विणास्पृष्टः पद्मभुवागुरौकवसतिःत्य
श्रीवीररुद्रोनृपः॰ अत्रप्रतापरुद्रस्य कुलशैलातिशायिसमुन्नतत्वमतिसमुद्रगाम्भीर्यंलोकपालाधिकमैश्वर्यंव्य
ज्यते॰ तथाकुलशिखरिपयोधिलोकपालनिर्माणसंरंभातिशायीविलक्षणाकाकतीयनिर्माणविभवइतिव्यज्य
ते॰ गुणीभूतव्यंग्यंयथा॰ प्रत्यग्रप्रसरत्प्रतापविभवव्याप्ताखिलाशांतरे विश्वश्लाघ्यनरेवीररुद्रनृपतौ सिंहास
नाध्यासिनि॥ आस्थानीसमुपागतैर्नृपतिभिस्त्रस्तास्त्रस्तपादद्विर्जिता श्चेष्टायामिरमुष्यकाकतिविभोर्दृष्टिः कृपाद्री

कृता॰ अत्र प्रान्ताभिषेकमहोत्सवस्य प्रतापरुद्रमहाराजस्याग्रे शरणार्थिनां पार्थिवानां तथाविधकार्यत्वोक्तिः पुनः
पुनः प्रणामादिव्यंग्यं तास्ताश्च दर्शिता इति॰ वाच्यादनतिशायीति गुणीभूतव्यंग्यः॰ चित्रं यथा॰ क्षोणीरक्षणदक्षिणाः
क्षणजगत्क्षोभातुरीक्षक्रमाः क्षुद्रक्षत्रियपक्षशिक्षणविधौ प्रोक्षिप्तकौक्षेयकाः॰ उद्दामोद्यमनस्यरुद्रनृपते दोर्द्द
ण्डयोश्चण्डयोर्गर्जद्दुर्जनगर्वपर्वतभिदादम्भोलयः केलयः॰ अर्थचित्रं यथा खगेन्दुं विजितं विएरि वुमहीराहं जलिं बिंस
लिअं पच्छजोऽजयलच्छिवासकमलाति विर्मातिर्णा अरणे वीरपअ्या अरुद्द विहणोऽजमसुघनुगुरणो सिटीएरिउजो।
विअ्याइ विहिणोएजसपीढवुआं खड्गयुद्धविडंभिजे रिपुमहीनाथांजलिं बिंबितं पअ्यं तोऽजयलच्छीवासकमल

मन्यंजे विज्ञानि नः मन्ये वीर प्रजापरूढ प्रभोर्जन्येषु ग्रहीतुं पुनः स कैरिपुजी विजानि विधेर्यातस्य [redacted]
पीठां वुढं॰ उभय चित्रं यथा॰ विद्यासमुद्रे मुवनैकमद्रे प्रजापरूढे ज्ञितवैरिमद्रे रक्षो विनिद्रे धज शौर्यमुद्रे कांतेव
पृथ्वीरमते घ्रणोद्रे॥ अनुप्रासोपमाभ्यां चित्रता॰ अथ ध्वनिविशेषानिरूप्यंते अत्र ध्वनेर्लक्षणमभिधामूलत्वे
नाविवक्षितवाच्यविवक्षितान्यपरवाच्याख्यौ प्रथमं द्वौ भेदौ अविवक्षितवाच्यस्यार्थांतरसंक्रमितात्यंतति र
स्कृतवाच्यतया द्विविधस्य वाक्यपदगतत्वेन द्विविधत्वे चानुविधत्वं विवक्षितान्यपरवाच्यस्य संलक्ष्यक्रमव्यंग्यासं
लक्ष्यक्रमव्यंग्यतया द्वौ भेदौ संलक्ष्यक्रमव्यंग्ये शब्दशक्तिमूलत्वे वस्त्वलंकाररूपतया द्विविधे वाक्यपदगतत्वे

प्र.र. न चातुर्विध्यं । अर्थशक्तिमूले संलक्ष्यक्रमव्यंग्ये अर्थस्य स्वतःसंभवित्वेन प्रौढोक्तिसिद्धत्वेन कविनिबद्धोक्ति
२१ सिद्धत्वेन च त्रैविध्यं त्रिविधस्य वस्त्वलंकाररूपतया द्वैविध्ये षड्विधत्वं । षड्विधस्यापि व्यंग्यव्यंजकतया द्वैविध्ये द्वाद
19 शविधत्वं द्वादशविधस्यापि प्रबंधगतत्वेन वाक्यगतत्वेन च त्रैविध्ये षट्त्रिंशत्प्रकारोऽर्थशक्तिमूलोनुरणनध्वनिः
उभयशक्तिमूलो वाक्यगतत्वेनैकविध एव । एवं संलक्ष्यक्रमव्यंग्यध्वनेरेकचत्वारिंशद्भेदाः असंलक्ष्यक्रमव्यं
ग्यो रसादिध्वनिः प्रबंधवाक्यपदपदैकदेशरचनावर्णगतत्वेन षड्विधः एवं विवक्षितान्यपरवाच्यध्वनेः सप्त
चत्वारिंशद्भेदाः अविवक्षितवाच्यभेदैश्चतुर्भिः सह ध्वनेः प्रथमं शुद्धा एकचत्वारिंशद्भेदाः तेषां प्रत्येकमेकेक मेकेक १

स्य एकैकेन संबंधे प्रथमभेदस्यैकपंचाशद्भेदाः द्वितीये पंचाशद्भेदाः तृतीये एकोनचत्वारिंशद्भेदाः अने
नक्रमेणोत्तरोत्तरस्य एकैकभेदपरित्यागेन वृद्धिंगतासुत्तरशतत्रयाधिकसहस्रसंख्याका मिश्रभेदाः अविव
क्षितवाच्यस्य संबंधे यो भेदस्तस्मिन्नेवांतर्भूतः विवक्षितान्यपरवाच्याविवक्षितान्यपरवाच्यसंबंधभेदो न
एथगुक्तः अनेनैव क्रमेण वस्तुध्वनेरलंकारध्वनिसंबंधेप्यलंकारध्वनेर्वस्तुध्वनिसंबंधभेदो न पृथगुक्त
इति पूर्वपूर्वस्योत्तरोत्तरसंबंधे एकैकभेदन्यूनतानाद्येयानस्यापि मिश्रतास्यापि त्रिरूपेण संकरेणैकरूपया संसृ
ष्ट्या च पुनश्चतुर्धा योजने चतुरुत्तरशतत्रयाधिकपंचसहस्राणि भेदाः शुद्धाश्चंद्रशरा मिश्रास्तु नेत्रानलेंदवः

संसृष्टिसंकरायत्तास्त्वब्धिखाग्निशरा मिथाः तत्र शुद्धानामेकपंचाशद्भेदानां नामधेयानि कथ्यंते· पदगता
र्थांतरसंक्रमिताविवक्षितवाच्यध्वनिः ॥१॥ वाक्यगतार्थांतरसंक्रमिताविवक्षितवाच्यध्वनिः ॥२॥ पदगतात्यं
ततिरस्कृताविवक्षितवाच्यध्वनिः ॥३॥ वाक्यगतात्यंततिरस्कृताविवक्षितवाक्यध्वनिः ॥४॥ पदगतशब्द
शक्तिमूलसंलक्ष्यक्रमवस्तुध्वनिः ॥५॥ पदगतशब्दशक्तिमूलसंलक्ष्यक्रमालंकारध्वनिः ॥६॥ वाक्यगतशब्
दशक्तिमूलसंलक्ष्यक्रमवस्तुध्वनिः ॥७॥ वाक्यगतशब्दशक्तिमूलसंलक्ष्यक्रमालंकारध्वनिः ॥८॥ पदग
तस्वतःसिद्धार्थशक्तिमूलो वस्तुनावस्तुध्वनिः ॥९॥ पदगतस्वतःसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः १०

पदगतस्वतःसिद्धार्थशक्तिमूलोलंकारेणालंकारध्वनिः।११। पदगतस्वतःसिद्धार्थशक्तिमूलोलंकारे
णवस्तुध्वनिः।१२। वाक्यगतस्वतःसिद्धार्थशक्तिमूलोवस्तुनावस्तुध्वनिः।१३। वाक्यगतस्वतःसिद्धार्थ
शक्तिमूलोवस्तुनालंकारध्वनिः।१४। वाक्यगतस्वतःसिद्धार्थशक्तिमूलोलंकारेणालंकारध्वनिः।१५।
वाक्यगतस्वतःसिद्धार्थशक्तिमूलोलंकारेणवस्तुध्वनिः।१६। प्रबंधगतस्वतःसिद्धार्थशा मूलोवस्तुनाव क्ति
वस्तुध्वनिः।१७। प्रबंधगतस्वतःसिद्धार्थशक्तिमूलोवस्तुनालंकारध्वनिः।१८। प्रबंधगतस्वतःसिद्धार्थ
शक्तिमूलोलंकारेणालंकारध्वनिः।१९। प्रबंधगतणस्वतःसिद्धार्थशक्तिमूलोलंकारेणवस्तुध्वनिः।२०

पदगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः ।२१। पदगतकविप्रौढोक्तिसिद्धार्थशक्तिमू
लो वस्तुनालंकारध्वनिः ।२२। पदगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोलंकारेणालंकारध्वनिः ।२३।
पदगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोलंकारेण वस्तुध्वनिः ।२४। वाक्यगतकविप्रौढोक्तिसिद्धार्थश
क्तिमूलो वस्तुना वस्तुध्वनिः ।२५। वाक्यगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोलंकार वस्तुनालंकारध्व
निः ।२६। वाक्यगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोलंकारेणालंकारध्वनिः ।२७। वाक्यगतकविप्रौढोक्ति
सिद्धार्थशक्तिमूलोलंकारेण वस्तुध्वनिः ।२८। बंधगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्व

निः।२९। प्रबंधगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोवस्तुनालंकारध्वनिः।३०। प्रबंधगतकविप्रौढो
क्तिसिद्धार्थशक्तिमूलोलंकारेणालंकारध्वनिः।३१। प्रबंधगतकविप्रौढोक्तिसिद्धार्थमूलोलंकारे
णवस्तुध्वनिः।३२। प्रबंधगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोवस्तुनावस्तुध्वनिः।३३। पदगतकवि
निबद्धोक्तिसिद्धार्थशक्तिमूलोवस्तुनालंकारध्वनिः।३४। पदगतकविनिबद्धोक्तिसिद्धार्थशक्तिमू
लोवस्तुनावस्तुध्वनिः।३५।। पदगतकविनिबद्धोक्तिसिद्धार्थशक्तिमूलोलंकारेणवस्तुध्वनिः।३६।
वाक्यगतकविनिबद्धोक्तिसिद्धार्थशक्तिमूलोवस्तुनावस्तुध्वनिः।३७। गतकविनिबद्धोक्तिसिद्धार्थवाक्य

२२ द्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः ।३८। वाक्यगतकविनिबद्धोक्तिसिद्धार्थशक्तिमूलोलंकारेणालं
कारध्वनिः ।३९। वाक्यगतकविनिबद्धोक्तिसिद्धार्थशक्तिमूलोलंकारेणवस्तुध्वनि ।४०। प्रबंधगतकवि
22 निबंद्धोक्तिसिद्धार्थशक्तिमूलोवस्तुनावस्तुध्वनिः ।४१। प्रबंधगतकविनिबद्धोक्तिसिद्धार्थशक्तिमूलो
गत वस्तुनालंकारध्वनिः ।४२। प्रबंधकविद्धोक्तिसिद्धार्थशक्तिमूलोलंकारेणालंकारध्वनिः ।४३। प्रबंधग
तकविनिबद्धोक्तिसिद्धार्थशक्तिमूलोलंकारेणावस्तुध्वनिः ।४४। प्रबंधगतलक्ष्यक्रमव्यंगोरसध्वनिः २२
।४५। वाक्यगताऽसंलक्ष्यक्रमव्यंग्योरसध्वनिः ।४६। पदगतासंलक्ष्यक्रमव्यंग्योरसध्वनिः ।४७। पदै

कदेशागता संलक्ष्यक्रमव्यंग्यो रसध्वनिः ।४८। स्वनागता संलक्ष्यक्रमव्यंग्यो रसध्वनिः ।४९। वर्तागत
संलक्ष्यक्रमव्यंग्यो रसध्वनिः ।५०। व्यंग्यगतो मयश्शक्तिकमलो ध्वनिः ५१॥ तत्र दिङ्मात्रमुदाह्रियते· अर्थां
तरसंक्रमिता विवक्षितवाच्यध्वनिर्यथा· मूर्धानो ऽपूर्यमास्माकाः क्किमित्योन्नत्यमिछथा इति प्रता
परुद्रस्यप्रणाताः प्रतिपार्थिवाः । अत्रास्माका इति सर्वदैन्यमूमयो वयमीदृशामस्माकं संबंधिन इत्य
र्थान्तरसंक्रमितवाच्यता· अत्यंततिरस्कृतवाच्यता यथा· विशादिमविलिप्तवियतो मधुरिम्पपरिपूरिता
खिलाशांताः। विहरंति यशाः परागौराः श्रीकाकंतीद्रस्य। अत्र विशादिमविलिप्तवियत इत्यंततिरस्कृतवा तं

प्र.रु.

२३ त्व्यं। अनेनैव क्रमेण वाक्यगतत्वेनाप्युदाहार्यं॰ अथार्थशक्तिमूलो वस्तुना वस्तुध्वनिर्यथा॰ अहोरात्र-

23 न्विनामासांश्चक्रुः पक्षान्विनातिथीः। रात्री विना च कांक्षंते काकतीयरिपुस्त्रियः। अत्रकतुप्रमतीनां म-

त न्मथोद्दीपकत्वात्तदभावो रिपुस्त्रीभिः कांक्ष्यत इति प्रतीयते। तेनेनासां प्रियवियोगरूपं वस्तु व्यज्यते॰ अनेन

प्रमापरुद्रस्य सर्वे शत्रवो निहता इति व्याख्यादतिशयः। तथा प्रियविरहविधुराः शत्रुस्त्रियः कतिपयव-

त्सरजीविताशया प्रथमम्मन्तूनामभावं वांछंति॰ अनंतरं तानपि गमयितुमशक्ताः कतिपयमासेषु प्राणा- ॰२३

न्धारयितुमुद्यताद्योत्सवतोः पक्षाणां विनाशं वांछंति॰ अनंतरं मासानप्यपनेतुमपारयंत्यः। कतिपय

दिवसेषुजीविताशयाराज्ञीणामसह्यंसमभिलषंतीति बहुवस्तुवस्तुनाव्यज्यते॰ वस्तुनालंकारध्वनिर्य
था॰ इक्ष्वाकाकतिवीररुद्रनृपतेः। कीर्तिर्जगद्व्यापिनी वस्तुंवांछति शंभुरत्र शयितुं लक्ष्मीपतिः कांक्षते
। स्नातुंवांछति दिग्गजापसगराः संवर्धितुं बाधयश्चेष्वंतेसविलासमभ्रमुरपिस्प्रष्टुंनैरिहते। अत्र हरश
स्यकैलासभ्रांतिः हरेः क्षीरार्णवभ्रांतिरिति। भ्रांतिमदलंकारो व्यज्यते। अलंकारेणालंकारेण ध्वनिर्य
था। काकतीयविभोः कीर्तिपुंडरीके विजृंभिते। धत्तेमधुकरक्रीडांजमालव्यामलंनभः। अत्रपुंडरीकेन
भोभ्रमरलीलांधत्ते इति निदर्शनालंकारेण आश्रयाश्रयिणोरनानुगुण्यरूपो धिकोलंकारो व्यज्यते॰ आ

अथास्य कीर्त्तिपुंडरीकस्य वैपुल्यं। अत्र सरस्वादृत्वप्रतिपादने नाल्पत्वं तमसः प्रतीयते एवमस्यत्नः सि
द्धार्थशक्तिमूलश्च॥ अलंकारेणावस्तुध्वनिर्यथा· प्रतापरुद्रस्य रणोत्कृपाणाः सद्यः समुद्यद्रुधिरारु
णश्रीः। आलंबने रोषकषायीतस्य कालीकटाक्षस्य विडंबितानि॥ अत्रालंबन इति निदर्शनालंकारे
ण सकलरिपुक्षयः क्षणात्क्रियत इति वस्तु व्यज्यते· कविप्रौढोक्तिसिद्धार्थशक्तिमूलत्वं यथा· आवं आव
खुरलिविहरत्कार्त्तिकेयप्रयाणे छिद्रच्छद्मप्रवणपदवीचारिणीं वारयंतो घैः। शश्वज्जीनां भुवनमहितां
काकतीन्द्रस्य कीर्त्तिं क्रौंचक्ष्माभृद्भवति महितो विस्मयान्निश्चलांगः॥ अत्र प्रतापरुद्रस्य कीर्त्तिः स्वच्छाव

सत्यामपि विस्मयकारित्वमिति वस्तु व्यज्यते॰ वस्तुनालंकारध्वनिर्यथा॰ वीररुद्रभटानां त्वां जयलक्ष्मी दृ
ढतान्तरा। कर्षन्त्यरिवधूकेशान्काननेकंटकिद्रुमाः। अत्र जयलक्ष्मीसमालिंगितान्वीररुद्रभटानां त्वां दृ
समदना इव कंटकिद्रुमाः शत्रुवधूकेशान्कर्षन्तीत्युत्प्रेक्षा व्यज्यते। अलंकारेण वस्तुध्वनिर्यथा॰ आसर
इसहीहिसंमलेंआवहुआएसिढिलमाणाए अ पगहराभयेण वस विहगएमणाहरेदइ१॥ अत्रोत्प्रेक्ष
या आलिंगनरूपं वस्तु व्यज्यते॰ अलंकारेणालंकारध्वनिर्यथा॰ अभयं याचमानानां काकनीयं द्रु विद्वि
२ षां। पक्षान्नांगीकरोतीव वनशाखाग्रकंपनैः। अत्र नांगीकरोतीवेत्युत्प्रेक्षया प्रतापरुद्र शत्रुभ्यो रक्षणं

प्र· रू·

२५ कथं तु विस्मितेवेत्युत्प्रेक्षा व्यज्यते· कविनिबद्धार्थशक्तिमूलत्वं यथा· अहं न हवे होडु अं आगारगाह करे
हिरस्वरा संसिणो। जनाश्‍क्षदकुरवु कान्याणनं मसीकाउं। अत्र विरहातुर्यीचंद्रिकामसहमाना रोषा
25 द्र दुचलितया कटाक्षोल्कया चंद्रं मषीकरोति सा रक्षणीयेत्यनेन वस्तुनाद्भुतः परं सा जीवितं धारयितुं अ
नाल्कान्यधुनैव समागंतव्यमिति वस्तुना वस्तु व्यज्यते· वस्तुनालंकारध्वनि [redacted] यथा· कस्त्वं ज्युम्मारिवलो
वेतिम गत्य रसि ननु यशोवीररुद्रस्यैकोयं तेदीप्रदेस्फुरति परिसरे मत्सुहृत्तस्य नापः प्रच्छायालं स्फुरद्भिः कु
मुदसरसिजैः ख्यापितं त्वत्स्वरूपं सोमाकौस्त्वागतं वा मवधि गिरि रयं कल्पितो निस्तमस्कः। अत्र प्रता

ह

परदृस्य यशः प्रतापयोस्सोमार्कसादृश्यप्रतीते रूपमा व्यज्यते॰ अलंकारेणालंकारध्वनिर्यथा॰ उ
अवहहेल्लाओ बहुएन अहारूढो विसिमरो माणो। णिवडुसमाअ मसंभमसंज्ञा अमए ओवओसर
इ॥ अत्रोत्प्रेक्षया प्रियप्रार्थनां विनैव मानिनीजनः प्रसन्न इति विभावनालंकारो व्यज्यते॰ अलंकारे
णावस्तुध्वनिर्यथा॰ अप्राप्यसेवावसरं नाथ कांता वृतस्य ते। त्वत्कीर्तिसेवमानेव दृश्यामास सर्वगा याद्दुरा।
अत्र सेवमानेवेत्युत्प्रेक्षया सर्वप्रास्वीकार्यत्वादिरूपं व्यज्यते॰ एवं प्रबंधादिगतत्वेन यथासंभवमुदा
हरणानि दृष्टव्यानि॰ विस्तरभयादिह नोक्तानि॥ ॥ अथ शब्दशक्तिमूलध्वनिः स च वस्त्वलंकारग

प्र.स.

२६

26

द्वि

त्वेन द्विविधः। तथा चोक्तं· अलंकारोथ वस्त्वेव शब्दाद्यत्रावभासते। प्रधानत्वेन विज्ञेयः शब्दश-
क्त्युद्भवो द्विधा॥ तत्रालंकारध्वनिर्यथा। एसो संझाराआ आसामारखुनुमं समाअमो दोहं· किंउणणण पओ
अं सकहादीस इएदं खु अचरिॲ। अत्र प्रकरणेन कांतानपवाचकाभ्यां ईयाम राजशब्दाभ्यां निशाचंद्रप्रतीतेरु-
पमा व्यज्यते· वस्तुध्वनिर्यथा· कांतारवाससंतप्ताः संशृणुध्वं हितादिताः कुरुध्वमधुना राजपादसेवां नरेश्व-
राः। अत्र राजपादसेवामिति शब्दशक्त्या प्रक्रांतस्य प्रतापरुद्रस्य प्रतीतिः प्रकरणाज्ज्ञायते· अनेन प्रताप-
रुद्रस्य सेवा कर्तव्या कि· मरण्यनिवासेन संतप्ता इति वस्तु व्यज्यते। उभयशक्तिमूलध्वनिर्यथा· जिह्मुरे २६

३ ध्वनिः तथा चोक्तं शृंगारतिलके। रसभावतदाभासभावशान्त्यादिरक्रमः। भिन्नो रसाद्यलंकारादलं
कार्यतया स्थितः॥ रसभावोदाहरणानि
चमुल्लसत्तं मण्डलं मन्मार्तण्डं नायुधः मुंच तु क्ष्माभृतः सर्वे निजपक्षविमण्डलं मितं। अत्रं क्ष्माभृतो निजपक्षविमण्ड
लितं मुंचन्तु जिष्णुरेव इत्यत्र चाद् शक्तिमूलता। मुल्लसत्तं मण्डलं मन्मार्तण्डं नायुध इत्यर्थे शक्तिमूलता। असंलक्ष्यक्रो श्री
मव्यंग्योरसैस्स्वरूपनिरूपणाप्रपंचो रसप्रकरणे भविष्यति। गुणीभूतव्यंग्यं मध्यमकाव्यमष्टविधं। तथा चो
क्तं काव्यप्रकाशे। अगूढमपरस्यांगं वाच्यसिद्ध्यंगमस्फुटं। संदिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुंदरमिति।
कामिनीकुचकलशवद्गूढस्यैव चमत्कारकारित्वादगूढं व्यंग्यं। यथा। स्त्रीत्वं यदि वार्यते शिखरिताः कुध्यं
तिनी चैकं हि नागं भीर्यं यदि वर्त्यते जलधयः क्षुभ्यन्ति गाधीकृताः। तत्त्वां वर्णयितुं बिभेमि यदि वाऽजानतो

२७ स्मयगस्त्यस्थितस्त्वत्पार्श्वे गुरुरारब्धरोहणा गिरेः श्रीविरराज प्रभो। उभयत्रयदि वाजातो स्मयगत्स्य इत्यनेन
जलनिधिपर्वतेस्योन विभेमी ति व्यंग्यमात्रागूढं अपरस्यांगं। यत्र रसादेर् रसादिरंगं न दृप्रिगुणीभूतव्यंग्य
मेव। यथा। वीतव्रीडमपास्तमन्मुदयहृद्स्वयं मा विमर्वित्स्वेदं निर्भरगात्रवेपथु मिलन्मूर्छं गलद्बाष्पकं। सं
जातप्रलयं च काकतिमहीनाथस्मरो द्वेजिताभूपाः शैलगुहासु यांति विजनं भीत्या समालिंगिताः। अत्र
त्वं शृंगाररसस्य भयरसांगत्वं। वाच्यसिद्ध्यंगं यथा। करालः काकतींद्रस्य करवालनवांबुदः धारया ज्ञामम
यत्सुग्रं प्रतापज्वलनं द्विषां। अत्र जलधाराव्यंग्या सा च करवालनवांबुद इत्यस्य वाच्यभूतरूपकस्य सिद्धि

कृदिति गुणीभूतव्यंग्यत्वं। अस्फुटं यथा· वीररुद्र कृपाणस्य महिमा कोप्यनंकुशः। प्रसन्ने कीर्त्तिगंगां यः।
पीत्वा द्विषद्समुद्रं दौ। अत्र कृपाणस्य जह्नोराधिक्यप्रतिपादनाद्व्यतिरेकः परमस्फुटः प्रतीयते। संदिग्धं यथा·
काकतीय विभो दृष्टिरनुरागतरंगिता। लग्ना कह्लारमालेव वध्वास्तुंगे कुचद्वये· अत्र आलिंगने छायां वाक्य
विश्रांतिः अथवा स्तनमंडलावलोकन एवेति संदेहः। तुल्यप्राधान्यं यथा· नेपाः प्रतापरुद्रस्य निषेवध्वं पदांबु
जं। अन्यथास्य मनस्तादृक् प्रसादकलुषायते· अत्र प्रतापरुद्रस्य पादसेवा यं ज्यते तदानीं नगरेषु वासो दुर्ल दिम्य
भ इति· व्यंग्यार्थस्य वाच्यस्य च समप्राधान्यं· असुंदरं यथा· एअसिवा महिला सो ता तारेंदद· सतोमो अंगुर

अणणिअं तिआएव हुआएसामलं वअतां॰ अत्र नरेंद्र दर्शन निमित्तं हर्षविशेषं ताव ध्वामुखं श्यामलमिति
वाच्यस्यैव चारुत्वं गुरुजन नियंत्रिता हं नरेंद्रं प्रतिदृष्टुं न गन वत्य । स्मीति व्यंग्यार्थस्य अचारुत्वं यत्र काकाअर्थां
न्तरमाक्षिप्यते तत्रापि गुणीभूत व्यंग्यमेव यथा पिअसहि कहे हि अहि आरखो णीलं छी सरंस इमं॰ सा॰ णा ओ
णा बहुमणइसोँरणा हो गुणा विसेस तओ॥ अत्र क्षो णीम धिकेति काकु कल्पनया अधिकान भवतीति व्यज्यते
त चित्रं तु काव्यं शब्दार्थालंकार चित्रतया बहु विधं तत्रैवं चोपमालंकार प्रकरणे भविष्यति। अथ महाकाव्यादयः।
प्रबंधा निरूप्यंते॰ नगरार्णव शैलर्तुचंद्रार्कोदयवर्णनं॰ उद्यानसलिलक्रीडा मधुपानरतोत्सवाः। विप्रलंभो

विवाहश्च कुमारोदयवर्णनं· मंत्रदूतप्रयाणाभिनायकाभ्युदया अपि· एतानि यत्र वर्ण्यंते तन्महाकाव्यमु
च्यते· एवमस्मादृशानां यैः कैश्चिन्न्यूनमपीष्यते· तत्त्रिविधं· गद्यमयं पद्यमयमुभयमयं चेति· अपादः पद
संदोहो गद्यं पद्यं चतुष्पदं· गद्यकाव्यं कादंबर्यादि· पद्यकाव्यं रघुवंशादि। असर्गबंधमपि तद्रूपकाव्यमुदीर्य
ते· असर्गबंधं सूर्यशतकादि· गद्यपद्यमयं काव्यं चंपुरित्यभिधीयते· वक्त्रं चापरवक्त्रं च सोच्छ्वासत्वं भेदकं। य
२ वर्ण्यंते यत्र काव्यस्यैरसा वाख्यायिका मता। यत्र वक्त्रापवक्त्र नामानौ छंदविशेषौ वर्ण्येते सोच्छ्वासपरिच्छि
न्नाऽऽख्यायिका। हर्षचरितादि। अथ क्षुद्राः प्रबंधा निरूप्यंते। येन केनापि तालेन गद्यपद्यसमन्वितं। उ

यत्युपक्रमं मालिन्यादिप्रासविविचित्रितं। तदुदाहरणं नाम विभक्त्यष्टकसंयुतं। यत्र आदौ जयतीत्युपक्रमं
मालिनीवृत्तरम्यं पद्यं निगद्यते। अनंतरमविच्छेत्युपक्रमात्पष्ठवाक्यानि सप्रासानि सतालानि प्रतिविभक्ति
निबध्यंते अनंतरं विभक्त्याभासस्तदुदाहरणं। संबोधनविभक्त्या यत्प्रचुरं पद्यपूर्वकं। विमुक्तपुनराकृष्ट
ष्टाढ्यस्याच्चक्रवालकं। आद्यंतपद्यसंयुक्ता संस्कृतप्राकृतात्मिका। अष्टभिर्वा चतुर्भिर्वा वाक्यैः स्कंधस
मन्विता। प्रतिस्कंधं भिन्नवाक्या रीतिर्दैवनपोद्धिता। सर्वतोदेवराढ्यादिरेषा भोगावलीमता॥ वर्णमानानां कबि
रुद्वर्णनप्रचुरोज्वला। वाक्याडंबरसंयुक्ता सामता बिरुदावली। ताराणां संख्यया पद्यैर्युक्ता तारावलीम

ता। एवं कविप्रौढोक्तिसिद्धाः क्षुद्राः प्रबंधा यथासंभवमूह्या ४। अथैषामुदाहरणानि विस्तरभयादिह नो
क्तानि॥ ५४॥ इति विद्यानाथकृतौ प्रतापरुद्रयशोभूषणालंकारशास्त्रे काव्यप्रकरणं॥ छ॥ छ॥ अथ नाट्य
प्रधानाः प्रबंधा निरूप्यंते॰ तत्र नाट्यस्वरूपं कथ्यते॰ चतुर्विधैरभिनयैः सात्विकांगिकपर्वकैः। धीरोदात्ता
द्यवस्थानुकृतिर्नाट्यं रसाश्रयं। भावाश्रयं तु नृत्यं स्यान्नृत्तं ताललयाश्रयं एषा दशरूपको काप्र[illegible]क्रिया। नृ
त्तनृत्ययोर्नाटकांगत्वादिह स्वरूपनिरूपणं कृतं। तथोक्तं दशरूपके। मधुरोद्धतभेदेन तद्द्वयं द्विविधं पुनः।
लास्यतांडवरूपेण नाटकाद्युपकारकं तेन नाटकानि दशरूपाणि भवंति। नाटकं सप्रकरणं भाणः प्रहसनं

डिमः। व्यायोगसमवाकारो वीथ्यंकेहामृगा इति ॥ नाट्याश्रयत्वेनाभेद इति शंका न युज्यते। वस्तुनेतृरसास्ते
षां रूपकाणां हि भेदकाः। वस्तु त्रिविधं· प्रख्यातमुत्पाद्यं त्रिविधं चेति· तथोक्तं दशरूपके। प्रख्यातोत्पाद्यमिश्र
त्वभेदात्त्रिविधं मतमिति। इतिहासनिबंधनं प्रख्यातं· कविकल्पितमुत्पाद्यं· संकरायत्तं मिश्रं चेति· एव
मादिवस्तुभेदाः इत्थं भेदान्नायकभेदाच्च रूपकाणां परस्परभेदः तथाहि· नाटके प्रख्यातमिति वृत्तं धीरोदात्तो
नायकः। शृंगारवीरयोरन्यतरस्य प्राधान्यं· अन्येषां रसानामंगत्वेनानुप्रवेशः॥ प्रकरणोत्पाद्यमिति वृत्तं।
धीरशांतो नायकः। शृंगाररसस्यैव प्राधान्यं॥ भाणो धूर्तविटो नायकः· उत्पाद्यमिति वृत्तं शृंगारवीरयोः सत्व

नामात्र सारता ॥ प्रहसने कल्प्यमिति वृत्तं पाषंडतापसप्रभृतयो नायकाः हास्यरसस्य प्राधान्यं डिमे
प्रख्यातमिति वृत्तं देवगंधर्वराक्षसपिशाचादयो धीरोद्धता नायकाः षोडश । रौद्ररसः प्रधानं हास्यशृंगा
रयोरप्रवेशः । व्यायोगे प्रख्यातमिति वृत्तं धीरोद्धतो नायकः वीररसः प्रधानं ॥ समवकारे देवासुरा
दयो द्वादश नायकाः वीररसः प्रधानं कल्पितमिति वृत्तं प्रसिद्धं वा । वीथ्यां कल्पितमिति वृत्तं शृंगार
रसस्य सूचनामात्र सारता ॥ अंके प्रख्यातमिति वृत्तं प्राकृतजनो नायकः करुणरसः प्रधानं ॥ ईहामृगे
मिश्रमिति वृत्तं धीरोद्धतो नायकः शृंगारस्याभासत्वं ॥ ॥ अथ तेषां सामग्री निरूप्यते । तत्र पंचसंध

यथा॥ तथोक्तं दशरूपके। मुखं प्रतिमुखं गर्भः सावमर्शोपसंहृतिरिति। संधिर्नामैकेन प्रयोजने नान्वि
तानां कथांशानां अवांतरप्रयोजनसंबंधः। तत्रारंभबीजसंबंधो मुखसंधिः। यत्नबिंदुसंबंधः प्रतिमु
खसंधिः प्राप्त्याशापताकयोः संबंधो गर्भसंधिः नियताप्तिप्रकर्योः संबंधो वमर्शसंधिः फलागमका
र्यसंबंधो निर्वहणसंधिः यथोक्तं दशरूपके॥ बीजबिंदुपताकाख्यप्रकरीकार्यलक्षणाः॥ आरंभयत्न
प्राप्त्याशा नियताप्तिफलागमाः॥ अर्थप्रकृतयः पंचपंचावस्थाः समन्विताः॥ यथासंख्येन जायंते मु
खाद्याः॥ पंचसंधयः॥ इति। आरंभादीनां लक्षणां निरूप्यते॥ औत्सुक्यमात्रमारंभः फललाभाय भू

ता

यसे। प्रयत्नस्तु फलप्राप्तौ व्यापारोतित्वरान्वितः ३ उपायापायशंकाभ्यां प्राप्याशा कार्यसंभवः॥ अपायो
भवतः कार्यनिश्चयो नियताप्तिः॥ समग्रफलसंपत्तिः ४ फलागम उदाहृतः॥ ॥ अथ बीजे पंचकं निरूप्य
ते॥ स्तोकोद्दिष्टः कार्यहेतुः बीजं विस्तार्यनेकधा॥ अवांतरार्थविछेदे बिंदुरछेदकारणं॥ प्रतिपाद्यक
थांगस्यात्पताका व्यापिनीकथा॥ अव्यापिनी प्रकरिका कार्यं निर्वाहि कृत्फलं। मुखं बीजसमुत्पत्तिः नानार्थरस
संभवा॥ अंगानि द्वादशैतस्य बीजारंभसमन्वयात्॥ बीजारंभानुगुण्येन मुखसंधेरंगानि प्रयोक्तव्यानि॥
उपक्षेपः १ करिकरः परिन्यासो वि--- युक्तिः प्राप्तिः समाधानं विधानं परिभावना। उद्भेदभेदकरणान्य

न्वर्थानि यथाक्रमं। एषां स्वरूपं निरूप्यते· वीजन्यास उपक्षेपः॥ ---- त्वद्रूपकरणां परिकरः वीजनि
ष्पतिः परिन्यासः वीजगुणवर्णनं विलोभनं। वीजानुकूलप्रयोजनसंघटनादि ------ वीजसुखा
गमः प्राप्तिः वीजसंनिधानं समाधानं। वीजस्सुखदुःखहेतुर्विधानं॥ वीजविषयआश्चर्यावेशः परिभावनं
गूढवीजप्रकाशनमुद्भेदः वीजानुगुणप्रोत्साहनं भेदः। वीजानुगुणप्रस्तुतकार्यारंभः करणं· एतानि द्वाद
श मुखसंधेरंगानि· एतेषां मध्ये उपक्षेपपरिकरपरिन्यासयुक्त्युभेदसमाधानानामावश्यकत्वं। अथ प्र
तिमुखं· लक्ष्यालक्ष्यस्य वीजस्यव्यक्तिः प्रतिमुखं मतं विंदुप्रयत्नानुगमादंगान्यस्य त्रयोदशः विंदुप्रयत्ना

नुगुण्येन प्रतिमुखसंधेरंगानि प्रयोक्तव्यानि: विलासः परिसर्पश्च विधूतशमनर्मणी। नर्मद्युतिः
प्रगमनं विरोधः पर्युपासनं वज्रं पुष्पमुपन्यासो वर्त्तसंहारउत्यपि॥ ॥एषां स्वरूपं निरूप्यते· संभोगवि
षयमनोरथो विलासः। दृष्टनष्टपदार्थानुसरणं परिसर्पः। अनिष्टवस्तुनि क्षेपो विधूननं· अरत्युपशम
नं शमः परिहासवचनं नर्म॰ अनुरागोद्भूटनोत्था प्रीतिर्नर्मद्युतिः उत्तरोत्तरवाक्यैरनुरागबीजप्रकाशनं
प्रगमनं· छलनादिनागमनिरोधनं निरोधः। इष्टजनानुनयः। पर्युपासनं प्रमुखनिष्ठुरवचनं वज्रं अनु
रागप्रकाशनविशिष्टवचनं पुष्पं अनुरागहेतुवाक्यवचनोपन्यासः चतुर्वर्त्तनिवर्त्तनसंहारः एषां मध्येप

रिसर्पप्रगमनवज्रोपन्यासपुष्पाणां प्राधान्यं॥ ॥अथ गर्भसंधिः गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मु
हुः॥ अस्याप्याशापताकानुगुण्येनोपक्षेपकल्पनं। पताकाप्याशानुगुण्येन गर्भसंधेरंगानि द्वादशपरिक
ल्पनीयानि। अभूताहरणं मार्गो रूपोदाहरणं क्रमः। संग्रहश्चानुमानं च तोटकानुबले तथा। उद्वेगसंभ्रमा
क्षेपा द्वादशांगान्युपक्रमात्। एतेषां स्वरूपं निरूप्यते। वस्तुतोपयोगिछद्मावरणमभूताहरणं। तत्त्वानुकीर्तनं मा
र्गः॥ चितर्कप्रतिपादकं वाक्यं रूपं। प्रस्तुतोत्कर्षाभिधानमुदाहृतिः। संचितार्थप्राप्तिः क्रमः। प्रस्तुतोपयोगिसामदा
नवचनं संग्रहः॥ लिंगादभ्यूहनमनुमानं। रोषसंभ्रमवचनं तोटकं। रूपजनाभिधानमधिबलं। अपकारिजनाद्भयमु
द्वेगः। शंकात्रासौ च संभ्रमः। इष्टार्थोपायानुसरणमाक्षेपः। एतेषामध्यमभूताहरणमार्गतोटकाधिबलाक्षेपाणां प्राधान्यं।

उशात्यंतमुद्धताः। हास्यशृंगाररहिता रसा रौद्रप्रधानकाः। चत्वारो कास्संधयश्च चत्वारो मर्शवर्जिताः। महेंद्रजालसं
ग्रामसूर्यचंद्रग्रहादयः। शेषं नाटकवत्सर्वं डिमः सपरिकीर्त्यते। अथ व्यायोगः। यत्रख्यातेतिवृत्तस्यादुद्धतो नायको
मतः। गर्भविमर्शरहितं डिमवद्रसयोषितां। एकवा॰सरकार्यं च स व्यायोगो महारसाः। अथ समवकारः। यत्रामुखं ना
टकवत्संधयो मर्शवर्जिताः। नेतारो द्वादश पृथक् ख्याता देवासुरादयः। वीरप्रधानाश्च रसास्त्रयो कास्तेषु चक्रमात्
वस्तुस्वभावदैवादिकृताः स्युः कंटकास्त्रयः। पुररोधरणाग्न्यादिनिर्मिता विद्रवास्त्रयः। धर्मार्थकामानुगुणास्तिस्रः
शृंगाररीतयः। प्रथमेंके निबद्धव्याक थायामत्र यावधिः। यामाव धिर्द्वितीये के त्वाभीये केर्धयामिका। असौ समवका
रः स्याद्वीथ्यैः कैश्चिदन्वितः। अथ वीथी। यत्र भाणवदंगानां कृमिर्द्दि त्तिस्तु कैशिकी। शृंगारोपरि पूर्णाः सा सूचनीयाति

मूपमा। उद्घात्यादीनि चांग्यनिमा वीथी वीथ्यंगत्वमता। अर्थांकः। पञ्चेति हत्तं प्रख्यातं प्रधानकर्तारोऽसः। स्त्रीणां विलासो वा
ऽप्युद्धनेतारः प्रकृतानराः। भासावत्तं क्षिकृत्यादिमठोऽस्य घाकृसंज्ञिनः। अथेहामृगः। मिश्रमीहामृगे हत्तं च तुरंकं त्रिसंधिकं।
मर्त्यदिव्यौ चानियमान्नायकप्रतिनायकौ। धीरोदात्तास्तिनयेदिव्यां हर्तुकामौ च कामुकौ। अवधप्रह्णमप्येवमाभासरसयो
स्तयोः। एषामङ्गिपादशरूपकोक्तौ मनुसारेण॥ ॥तत्र सांगं नाटकमुदाह्रियते महांकौतुकवेदिमागतवतो रम्यो न्यमा
से दुःखोः शैलैर्मरुहिमात्प्रमम्यतिमिर्दैवैर्हरीन्द्रादिभिः॥ व्यामापार्श्वमुगे पुरौ बुजमुखापश्चाद्गुमेनादिभिः साध्वीभिः शि
वयोरयागसरसि वैवाहिकी पातु वः। एषाद्वाविंशतिपदी नांदी। अस्याविवाहमहत्त्वयोः शिवयोर्दर्शनं तथासकृज्जन शिव
रोद्रुपरिहतस्य प्रतापरुद्रस्य काकतीयलक्ष्मीप्राप्तिर्नाटकप्रयोजनरूपा। किंचिदर्थशसूच्यास्त्यते। नांद्यन्ते सूत्रधारः स्तम

तावदवलोक्य सहर्षं कथयामास। चित्र एव समंततो रंगमंगलविधिः। तथा हि। आविः कुर्वंति मुरजाः सर्वतः शब्दमाधुरीम्। संगीतो
पनिषद्विद्याधीराः प्रस्तावयंत्यमूः। एतद्रंगप्रसाधनसमार्ध्यनं। मम स्नुता महादेवौ पितरौ यस्य विश्रुतौ। नरनागाकृतिः
श्रीमान्महादेवः श्रेयसेस्तु वः। ऊर्ध्वमवलोक्य चिरादनुकूलेन कालेनापगतदुर्दिना निदिक्षु खानि पतः। विहरद्राजहंसश्री
विलसन्मित्रमंडलः। तस्माद्विनिसन्मार्गप्रसन्नः शरदागमः। का[illegible]ः। मार्यसूचकाभ्यां च तु समाश्रयणेन संस्कृतप्राय
नराश्रितवाग्वैभवहाररूपा भारती कथिता। सविनयमुपसृत्य समाभिमुखमंजलिं बध्वा ओमध्यमभुवनभागधेय पृवि वर्तस्वे
कशिलानगरपुराणराशेः काकतीयकुलदेवतायाः स्वयंभूदेवस्य सनातनमहोत्सवं समासे द्विवांसो विद्वांसः कलाराविनाद्भवे

नास्वरस्रोम्ममसवेदाचार्यस्य पुत्रमभिनवदर्पणं मामभिनवरूपकप्रयोगानुज्ञया परमनुगृहीता। आ काशोकरांद
त्वा· किं ब्रूथ· यास्मिन्ज गन्म गत्नमास्तिवस्तु पस्मिन्स्वर्णम:स्यहपमजह्मा। तन्न च्छोत्र यो लेचिनयो: पथान· सगाटके
नाटकमाविरस्तु। सह र्षं· अस्मन्मनोरथसंवाद्येव परिषदादेशः। यत्सनाथचरितानुबंधप्रबंध·सामाजिकानामनसि
वर्तते· अहो सर्वं सुहृदादिष्टमनु विधात्राधीनाः· यतः। समास्वयं परमेश्वरस्य प्रतापरुद्रस्य गुणा महार्थाः। अहं च नाट्यमु
तिपारदृश्वा सुधासु वल्लभस्य कवेर्वाचः प्रशस्याभिमुखीकरणा रूपा भारतीवृत्ते रंगप्ररोचना· सविमर्शं· कथमस्मत्प्रेय शिव
सी संगीतशालिकाभिरयति· प्रविश्य नटी· पुरोवलोक्य सस्पृहं· किं भणइ एस हुं सुइमंजीररवो सहास विहरनीए· अह

संजीअसुईवाविराणादराणवमुपहतुंजसीआरण-ओ॥ एतस्मात्स्माद्दनेकार्थ्यंयोजनरूपंत्रिगतंप्रस्तावनांगंउपस्त्व·
इह द्भ्रकोसिअओ ओअराचिं ठीअदुत्ति। सूत्रधारः। आर्ये। पजेहेकलेहंसनादमधुरंगास्सामिगीतिंधुवांलास्यंचारुभिरं
गाहारलालितेराविछरिष्या। मिपतारम्यंपक्तिनरंगमंभगलविधिंसंपादयिष्याम्यहंप्रागित्सुक्तवत्तीनदघनिपुणोनिर्द्दि
ठमेवंत्वयो। एतनात्रिपसहशैवकैयेरुपलंभानाछलनं। नटी· समयं· नटसामंगिसंमंगीकारुविलंबिअं: संजीवआरखु
एसाकेराउऊरूवस्सराण्पओ-ओठंछकमीअदुसु·नन्वियमेवनिरूपयत्वितिपत्रिकांददाति· नटीगृहीत्वासंस्कृतमाश्रि
त्यवाचयति· तेजः पर्यापहरयोः किं किंसंबोधनंमतं। किमाशीर्वादविषयोविधानायकृतिभ्रका। नटीसमंदस्मितं·
निरूठपंरवुरदंछेआरागंवराणपडिमादिकीरिसंकुत्तरंसीरूवेदुअंअदुत्तो॥ अपिसुव्यक्तमेतत· प्रतापरुद्रकल्या

3 रामिति प्रतीपतए व· एषा। निगूढार्था नालिका। नटी। कहं कहाराणा-अग्र राणां महे याणु बक्षमराो हरं। खुनाउ पं-अपावो पप
दं। क्लि दं तं सररणोरणामं कहं-आत्रं नि पुद्धी अदि। सूत्र· अयि त्रि पे भूयतां· तं मुजानं समुद्वीक्ष्य क्षोरापां रविमिवो दितं प्र
तापरुद्र इत्याख्याम करो त्का कतीश्वरः। अमद्य· विस्मा विश्वेकवीरस्य का कतीयकुले स्थितं। अवतारम मुंज्ञात्वा वीर रुद्रं
प्रत्यक्षतो नटी· लोपारां कराणुजनभात्र धेएराए एदं रामहुजुआरां मुरारी श्रो दु। चिरं सहनं टविं जारणुवं टसां फलित्रं। जे
रारेतो अमं गलं काअ इरें दव रित्रं अहि रिणं जहि इ। एतत्वाङ्गसं गन हत कार्यावलगनादवलजितं। सूत्रधारः। अहो प्रज्ञा संवा
दोपमापुष्पसाः· पदिं पंकवी नां प्रश्नो नारमालिका· पथा। किंज। किं लो के भवसो भांग्यमंगलं श्रवणो मुहुः। किं मंगलं मप्र शिव
तापं करुद्रस्यान्वरि ताद्भुतं। एतत्प्रश्नोत्तरमालारूपमुत्खाप्यकं· नटी-अं अपरिं णुणोत अं। वं सघदी आदि· सूत्र· आर्येख
रा

पादौ रेरुद्दारश्श्रीमीदृसं पदिपं मम। प्रबंधलक्ष्मीरिसेव विदर्भफणिति स्स्खा। एष प्रियः स्तोत्ररूपः प्रपंचः। नटी। ए आरिसगु
णमहं घे पच्चावरूंदवरिअंअं जि करंत स्स कइराणो सुपुं सोमरं संसई पसा अे। सूत्रधारः। आर्ये एवमेव नन्वेष कविभारत्यो वी
कुलिः। यथा किल प्रान्तमीर। निवृत्त किं नव कृपो पापेय किं प्रस्तुतं जि ह्वाकृाकृतिवीररुद्रन्यवेः स्तोत्रापसं न घदि। ता जातं मे
विहरंतु वाग्लहरयः संध्यानटहूर्जटित्वंगन्मौलि मरं। गीरा कि लक लोरंभ प्रियं भावुकाः। एषा अन्योन्य संलापरूपा वाके
लिः। नटी। अम्हाई रिसराणेंदचरि आरउअ ओरोरांटाउं वरोहो दिसाविति संजसेरा वैवइमे हिं अअं। सूत्र। किं चित्तास्य पं। आः
कि मुच्यते निरवद्यानुमम नाट्य विद्यासामग्री। कीदृशा पुनस्तव गीतयोग्यतयाभिव्यते। नटी। संगीआसारं समह
स्स वोडं वेलिलं। विजइ। अवधारा आणावंतरां अरे हे उअअओ। एतदन्योन्यवाक्यादवित्तला। सूत्र। विरमविहितएवाहम

स्मिनन्विपमुपक्रम्यते ध्रुवा· नटी· कार्ष्णकन्द्रियागान प्रतिज्ञावचनं संभ्रमोदित मिति गाउं। नटी सस्मितं। कहं अत्तं ओधुवंगा अ
इमत्तं· अपि कथमधीक्तं एव वत्सयानाद्द विघ्नोतिशोषंन जिघ्रति· एतट्ट कस्मान्यथा पयोज्ञनरूपमेव संपादितं· सूत्र· आर्ये
नूनं ध्रुवा गानोत्सुकं न वचेतः। तदारभ्यतां संगीतिः। नटी· तथा करोति· लच्छीसरं सईअरमाधवलिअभुवरांतवा विरा अ
तीविलसंतकुवलअसिरी राअसपसाहरगीकुरगाइ॥ सू· आकर्ण्य सरसावेशं· गाढ्या लिंगनसंमर्दमसमक्षर गलत्सुधां। धु
वांकरोमि सर्वांगेभ्यो नैकामनन वर्षिणीं॥ एषरसावेशादसंगवार्थव्याहाररूपः प्रलापः। नटी· सोपहासं· सउमारखुप
सा अं अस्सारिसं दप्पारिसं गसाए वेलए लंलेसमसहरं। एषहासस्लोभकरोव्याहारः सूत्र· सव्रीडं। रसाअं अस्सासिदं या शिव
स्वादेन नतरत्ना ये माद्यांति विपश्चितः। तएव भावुकालोके भवंति हृदयालवः। एतद्धोषस्य गुणगत्वारोपानुरूपं· नटी· अं अो

अरांतरकरारिणां आरिणि वेदु · सूत्रकारः । नन्विदानीं सभापति · देवः स्वयंभ मैरूपभ्लोक्यते · सर्वांगविन्यसस्तर्वपंग ज्वालं
रुताहृते: । रुद्र स्मृ ह्रिमो भाति विभ्रानुग्रहकारिणः । नेपथ्ये हेतोः सन्यं श । सर्वांगीणसर्वमंगलाश्छ हातिरेवापंकहद्भ्र
ति · सूत्र · सहर्षं कथमुपक्रांतमेवास्मद्वाक्यानुरूपं नेपथ्ये न प्रस्तुतस्यानुगुणं कुशलैः कुशी । लवैः । अतः काकतीपनरे
श्वरगुणावर्णिनो पोग्पतपावचनमिवो पक्षिप्यते · अपंकथोद्घातः पुरोवशोकृप कथमेताल्लिका विनरा वाभिवर्तते ए
षोय । मिमुपक्षेपी प्रयोगातिशयः प्रस्तावनांगं · तदेहि आवामनंतकरणीयाय सज्जीभवाव इति निष्क्रांतौ । सप
मां नाम प्रस्तावना ॥ ॥ ततः प्रविशतः कांपिल्य कौलनौ वैतालिकौ । प्रथमः सहर्षं · पोयं जानुस्तिनो कोप थिनसुच
रितेनकाकतीपान्ववायेषपैरमभ्रेपां स्पजस्त्र विनरति भगवान्देवदेवः स्तुयंभः । यस्माज्जगत्सर्वपृथ्वीनिमकुटमणि

5 भ्रेशिकेलीवपस्याःसोयंनृपालमौलिर्जयतिगुणमहानुद्रदेवोनरेंद्रः।स्वयंभूदेवस्यभ्रेयोवितरणरूपबीजन्यासउ
पक्षेपांगी।द्वितीयः।योरुद्रोरजताचलेस्थितिमगाद्दर्शीगनारिःपुरासोयंसंप्रतिकाककीतीर्भवनेसर्वांगनारिस्थितः।स्थानेय
द्विषमावलोकनकलामात्रेणभस्मीकृतोन्यासस्त्वैत्रिपुराणिचित्रमधुनारुद्रेविधीयते।प्रथमः।खेसाधु समर्थीतं।।
अन्यथाकथमस्मैमहाराजायस्वप्नेकुलगुरुसहस्राःस्वयंभूदेवःतादृशोभिप्रायःसंग्रहकारिकामुपादिष्टवान्‌।स्वयंभू
देवप्रसादरूपस्यबीजस्यबहुपकरणामारिकरः।द्वितीयः।सविमर्शाश्चर्यं।कथमवगतंराजरहस्यंवयस्येन।प्रथमः।सखे
कस्यवानविदितमिदंयत्सर्वस्मिन्नपिनिजनगरमहोत्सवमादिशतारुद्रनरेश्वरेणकुलदेवतायाःस्वप्नोपदिष्टःप्रसाद
नविशेषाःप्रख्याप्यंतरवः।कुलदेवताप्रसादरूपस्यबीजस्यप्रख्यापनेनविष्पत्तिःपरिन्यासः।द्वितीयः।अहोनिरंतरप्रसा शिव

दोन्मुखतादवस्य· यथाकाकतीयत्रसवभ्रपास्तुत्तरोत्तरमनुबध्यंते· बीजस्यश्रेयोनुबंधनगुणारव्याना ह्विजोभवं।तद
स्मिन्नेव महीपसिमहे ममंमउत्पारवंउत्तचलमर्तिगंडमुपक्ष्मोकयि— मयमेवावसरः।तदेहिराजकुलमविशावः।मथमः।वपस्य
स्तोमृतंपुरोध·ममुखानमान्यदृह्नामुरस्तून्यकल्याणास्वमकमंमीमांसमानोनपतिरयंतरास्त्थानीमधितिष्ठति·नदावामपिना
वदितोगत्वायथावसरं मयतिष्यावः।इतिपरिक्रम्यनिष्क्रांतौ·अयंशुद्धविष्कंभः।। ।।ततःप्रविशतियथानिर्दिष्टोराजा·चा
मरग्राहिणीच·राजासहर्षातिशयं·अहोप्रसादातिशयःपरमेश्वरस्य।सोमार्काभिजनंतमद्यजयतिश्रीकाकतीयान्वयः
पातिव्रत्यमुपैतिसांप्रतममीयस्मात्सुविश्वंभरा।अस्माभिर्निर्जरेशःमस्तिमधुनाधुन्यामहेमन्यतेयत्कर्तव्यमुपादिशत्कुल
पतिर्देवःस्वयंभूःस्वयं।पुरोधसः।महाराजभवाहृशाएवपरमर्हतितादृशमहामहिम्नोदेवस्यजितोहितोपदेशानं·अथवा

6 किमत्रालिनवं।पुत्राणांहितोपदेशाधिकारःपितुरेवायदित्थंकथयंतिनहृदः।सैवोमाचेतिनिर्दिष्टासोमाचेतिप्रथामगात्।तव
मातांशिवःसाक्षाद्देवोगणपतिःपितामेत्रिशा।एवमेवैतत्।त्वमन्यथाकथमीश्वरप्रसादादृतेनिरंकुशंस्तीव्याप्तिविशेषस्यलोका
धिपत्यं।एवंमानुषंशंभुमागणाधिपतिमहाराजेनाभ्यंतराणुभावमहिम्नःसहस्रमत्रपुत्रइतिव्यवहारःकृतः।तदनुगुणाःस्वरूइतिस
माख्या।पुरोवलोक्यसकौ—ककीदृशीदेवस्यस्तस्योपदेशपरिपाटी।राजासादरंइदंनिवेद्यते।कदाचित्कल्याणोरजनिसमयेस्मे
रवदनंपुरःप्रादुर्भूतंसुपुवतिवपुःसाक्षान्निटिले।त्रवर्तीचंद्राभ्यांमहितमकुटंप्रक्ष्यकिमपिस्वयंभूदेवोसौमहइतिहठो— न
ममजं।अनंतरंत्वमेवं।वपुषाहंनमस्कृतमस्तुवन्सन्नतयोगिरा।स्वामिनेकाकतीद्राणांरत्नाममनमुपाहरं।वामरम्नाहिशाी।अ शिव
होदेवंसत्रप्पुसंधारणं।त्रसिविरोपिकुलसामिराणेसमाराहरणं।पुरो।किमुच्यते।आविषमहूपःखलुस्वयंभूदेवेकाकतीयनर

देवाः। ततः। राजा। शय्याशिरःस्थानकृतस्य पूर्णकुंभस्य तोयैः परिकल्प्य पाद्यं। अतीदुस्तारैर्मरीचिभिः किलाहमपूजयं देवत
मस्मदीयम्॥ अयं च विभुः स्वयं भरतकुच्छुरितस्मितांगिरं सवामार्थ्ये वक्षपल्लाविता॥ स्वशक्ते रेताभयदानशालिना कृतांजलिमां
विनयानतांजलिं। पालिकलग्नमस्तकौमेयमन्योन्यभागैस्तपोविशेषैरनघैः पार्थिव्याः। समस्तकपलैः सच्चरितैः प्रजानां प्रताप
रुद्रोपमिहादनीर्णाः। वत्सकाकनीयकुलप्रदीप। स्वीकृते पुत्रभावेन दोहित्रे प्रादुर्भावपा। अस्मिन्विषेहिभौरेये पुर्वीमुर्वीधुरा
मिति। पुरोहिताः सप्रमोदं महाराजकाकनीयकुलयोगक्षेमविधानदक्षे गौदाक्षायणीपतिना साक्षाद्देवमादिष्टं। तदाप्र
पमेवमनोरथः॥ प्रियंकरश्चायं महोत्सवः सर्वप्रकृतीनां। तदारोहतु प्रागतिस्वच्छोवराज्यस्य प्रतापरुद्रस्य भुजशेखरं सा
गरमेखला। इयं प्रयोजनानिर्भरतारूपा युक्तिः। ततः। तद्वचनमाकर्ण्य प्रीतिनिर्भरहर्षविकस्वरलोचना मेदिन्यपि देवस्य पार्श्वे ह

7

का। चामरग्राहिणी। महाराज श्रूयतां इह त्रिलिंगांध्रपृथ्वीं अमरावती एव संप्रति एकशिलेति हरिसारथिभावो रणपालयं भट्टदेववचनाकर्णने

नमे दिव्याः सुखागमने न प्राप्तिः। राजा। काकतीयकुलश्रेयसां देवस्य प्रमाणमिति। तस्माच्छाशिरसि मयाधृता। देवो पि प्रसा

दातिशयमवालोकयां नहि तो भवत। इदं मे दिनीप्राप्तिहेतोः बीजभूतं तस्य स्वयंभूदेवोपदेशस्यांगीकरणात्समाधाने। मंत्री। विश्व

तिर्लज्जात्यागोऽथ संज्वरः। उन्मादो मूर्छनं चैव मरणं चरमं विदुः। अवस्था द्वादशैताः कामशास्त्रानुसारतः। केचिद्दशा
वस्था इति कथयन्ति। आसां स्वरूपमुदाहरणं च। आदरादर्शनं चेच्चक्षुःप्रीतिरित्यभिधीयते। यथा। एसो रु॰ दासि॰ श्रो॰ श्रारा
श्रणसो श्रत॰ किं श्रो सवो सजाश्रो। मत्र॰ सोदिमु॰ लिमं नो वंदो बुविमु॰ कलच्छ रागोपरिपु॰ रागो। मनःसंगः प्रियतमे नित्यं सं
चित्तस्याविभ्रमः। यथा। सहि श्रोम हमसा विल॰ गइरु॰ दसा रे॰ द॰ पिकीस्त कवि श्राश्रो। तेसा श्रहं पिविमु॰ काहसा श्रानुहसेरु शिव

काव्यथा। संकल्पोनाथ विषयमनोरथ उदाहृतः। यथा। दरतहसित्रस्वगिज्जाति गेहसि। हाइराज्जवरिच्छइ। रुद्दसि वञ्ज्ञा
किडु कोइ ज्जावज्जुमंमि। सा वड्ढति। अथ प्रलापः। प्रलापः प्रियसंश्लिष्टगुणालापउदाहृतः। यथा। जं हसिउ रोतुहम
हुरो तह सुह वो नह सो। मसंबो चो। एकों रुदसि वो चीअरमोढि पोढ महिलाणं। अथ जागरः। जागरस्तु विनिद्रत्वेग
मिष्यते। किंह इविदिसांचंदाच्च बुद्धसहासि ल्लादीक्षा। मज्झरोणे विघु खिञ्ज्ञमरो रोसा दासि विरोगइ सोवेइ। कार्श्यमंग
स्य तानवं। चंद्रास्य कथमंगुलीपकामिदं केयूरितं नेत्र रविप्रेम्णां प्रेपसि वैभवैः सखल्लुकोऽमेसिपत्नीपरः। ज्ञातेमानि
निकाकतीवनचतो सत्का सिलि सत्संशुभेश्यामां गां सखल्लु स्थिरां रमपनेतां तांचशैलेन्तामें। अथारतिः अन्यत्राप्री
तिररतिः। यथा। दूसे इ चंदसि हिं सीं दइमत्वेज्जा सिलं समाहंप। ऊसव पसुहीसा सुहननुमेकिं पमुंतं सि। व्रीडान्याजोपसं

38 ज्वरः। त्वंद्विजअ महिना समजं तहभसि। अं मुञ्चरादुः वि रती दाए। ज्ञहसो ऊरा गुरूञ्चरागे ज्वो सर ३ विल। जि ज्वो दूरं
अथ ज्वरः। ता पाधिक्यं ज्वरो मतः। मोह सिसिरो व ज्ञार बहु ज्ञा। विरः जि रेरा गुरुञ्च तोरा। रु दरा रेसर कं ख३स हृदं तु हृदं
नरा। म ञ्च ज्ञं। उन्माद मरणा पोः प्रागे वो दाहरणा दर्शितं। प्रच्छी सम्पतरे हन्ति बीहो द्विपनिमीलनात्। पयो। चेतसी
एरारें दं द हूहि ञ्चञ्च। ञं म ञ्चः छी ए। करगा ३ बहिरा ३ विपुक्तयो रितिश्रृंगा रा ति लकेक थितं। संभोगस्य परस्परा
वलो कनसंभाषणा लिंगनचुंबनाद्यनेकव्यापार मयत्वे नानंत्यादेक विधत्वेन गणना कृता। वैपथ्या। रहः प्रसा
सन्ने हृद यदर्पितेरुद्धत्त्वपतौनि हृत्तामाना ज्ञाविरलमपि लज्जा विलसितं। किमन्यत्ते गोप्यं बहिरबहिरानंदमस शिव
राः स्मरावेशः कोपि प्रियसरिवित्वयेतोकयतिमां। विप्रलंभः पुनरभि लाषेर्ष्या विरह प्रवास हेतुकत्वेन चतुर्विधः। अत्र

भिलाषो नाम संभोगानुरागः। यथा। अन्योन्यभावशरणा मनंगविलासगोष्ठीशय्यावसार्धमपदानि मनोरथानां ॥
प्रेमानुबद्धमुदयद्बहलानुरागं लभ्येत रुद्रनृपतेरवलोकितं वा। नाथ कस्या न्मा मकि भवाचित्तवृत्तिप्रच्छी। तयोर्विप्र
लंभो यथा। लक्ष्मीरस्य विलोचनाञ्चवसतिः सेर्ष्याव दालोकनेव — स्थापि स रस्वतीनमहते सा कं न वयाभावशं ॥
लीलावर्षणा विष्णुकृतापि मही बाहुस्थिता का कृतिश्नोरागी दृष्टेन हि केनवानिस्तुभजेमानेन किं तामपि। विरहो
नाम मन्नद्धमंधो जयो नोयकयोः केन चित्रकारेण पुनः समागमकालो तिक्षेपः। यथा। अंगेषु जीर्णोषु विभूष
णानामन्यास मार्गेपि मुहूर्तशोभी। सख्यस्तदास्ता पविंशिकमर्णीति रानीय तां रुद्रनृपः किमतु। यूनोर्देशान्त
रहातिस्तं प्रवासः। तेन विप्रलंभो यथा। सेव्यो स्तु रुद्रनृपतिर्निखिलैर्नृपालैर रत्नुत्तवेषु सुलभा न हि वल्लभानः॥

३८

39 रत्नं कलिंगमुहदां विरहातिपातादंगानि यांति तनुतां दिवसायुगं तिरस्ताभासो यथा। प्रासादगर्भवलभीषु कपोतपाल्यां पा
रावतीरमराचुंबितवंचुकोटिं। आविर्भवत्सुरतकूणितरत्नकंठीमालोक्य काकति विभुः स्मितमातनोति। भावोदयो यथा।
मुग्धे त्वत्र वर्तते ह्रदि मनोजन्मैव नाम्नः शपेत स्याप्न मस्य किमत्र कार्यमपरं किं जन्मसद्याद रः। को न्यस्त्वत्र तते विंबएव निपुणो
जानामि कामाधिकः प्रेयान्नुद्ध्रन्यपस्तवेति कंपितानना ननाम हृदुःखः। अत्र लज्जाया उदयः। भावशमो यथा। लक्ष्मीस्त्वं पुरु
षोत्तमस्त्व वरतिः श्रीवीरस्तु द्रोन्यपस्पष्टामंबुजविपरस्य सदृशो यो गच्छिरात्संमतः। तस्मात्तत्र नियमस्य सांप्रतमिदं वावैमन
स्यं मनागित्यालीप्रणतां विलोक्य विवसद्वक्त्रांबुजा मानिनी। अत्र कोपस्य प्रशमः। भावसंधिर्यथा। प्रतापरुद्रस्य दिगंतजैत्रयात्रा शिव
प्रभतेः पद्मप्रणामैः प्रियानुलापैश्च तदा भरतानो रोमांचवर्माहतमंगमासीत्। अत्र वीररसं गारकृतयोः हर्षयोः संधिः। भावशबल

तापथा । निंदंत्वघकुलस्त्रिपः प्रियन मोत्नभ्यः सुरवं केनवा भाग्येनानुमतं न किं गुरुजनैः कावासरवी प्रेष्यते । किं लोक
स्यभवेत्रासि हून विरात्स्वछंदमं कं कदारोक्ष्यामि स्थिरताकदा हृदि भवेघातव्य एव प्रियः । अत्रौत्सुक्यादीनां शबलता । अथर स
संकरस्यादाहरणं । तत्र शृंगारकरुणयोः संकरो यथा । आ सन्नेपि महोत्सवे कथमितस्त्यक्त्वा प्रवासं व्रजेः पान्थ त्वं कथमाव यो
र्विघटनं को वा विधिः कांक्षते । इत्थं स्वप्ननिवारितप्रियतमप्रस्थानबुद्धिस्ततो बुद्ध्वा मन्दं तिकाकतीयन्त पंजेत्वद्वैरिनारीज
नः । पीत्वामांसोपदंशं हृदि रदगलद्गलद्रक्तमैरेयधारां प्रन्नोमस्तिष्कलेहैर्नदछित रिपुवपुः कीकसैः स्मेरदंष्ट्रः । विभ्रद्रौद्रांत्र
मालां जनितजनभयो भैरवाकारघोरः खेलत्यापोषनोर्वा त्रिभुवनजयिनो वीररुद्रस्य खड्गः । अत्र बीभत्सरौद्ररसयोः संकरः ।
एवमन्यदपि द्रष्टव्यं । अत्र रसोनापका । अतएवायदि परं निपुणानटचेष्टयातथा विषकाव्यश्रवणाबलेन च सामाजिकैः साक्षाद्भ्र

व्यतो परगतस्यापि रसस्य सम्यग्भावनया निरतिशयानंदजननमविरुद्धं। अथ वा मानात्वादिशब्देभ्यो योषिन्मात्रप्रतीतौ रा
वणादिशब्देभ्यः शत्रुमात्रप्रतीतौ सत्यां हृष्टेन तत्तद्विशेषणास्वेसामाजिकाभ्युपगमपि न विरुद्धं। न टस्यानुकरणमात्रपरत्वा
नैव रसाश्रयत्व। तस्य भावकत्वाभ्युपगमे सामाजिकत्वमेव। अनुभावादीनां प्रकाशनं तु शिक्षाभ्यासपाटवेन घटते सानांपर
स्परविरोधे पिकविप्रोक्तौ क्वचित् समाश्रयणे न कृत्रसमावेशो न विरुद्धः। विरोधक्रमस्तु शृंगारतिलके कथितः। शृंगारबीभत्सरसौ तथा
वीरभयानकौ। रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः। रसोस्विन्तिर पिसंमता। तथोक्तं शृंगारतिलके। हास्यो भवति शृंगारात्क
रुणो रौद्रकर्मणः। अद्भुतश्च तथा वीराद्बीभत्साच्च भयानकः। व्यभिचारिभावानां तत्तदानुगुण्यमेवं प्रतिपादितं शृंगारतिलके। शिव
तथा हि। शंकासूयाम ३ यंग्लानिर्वेदश्चिंतास्मृतिधृतीः। औत्सुक्यं विस्मयो वेगो व्रीडोन्मादौ मदस्तथा। विषादो जडतानिद्रा

वहित्थं श्वापलं स्मृतिः । इति भावाः प्रयोक्तव्याः शृंगारे व्यभिचारिणः ॥ श्रमश्चपलता निद्रा स्वप्नो ग्लानिस्तथैव च । शंकासूयाव
हित्था च हास्ये भावा भवंत्यमी ॥ संत्रासो मरणं दैन्यं ग्लानिश्चैव भयानके । अपस्मारो विषादश्च भयं रोगो रतिर्मदः । उत्साहश्च ति
विज्ञेया भावा बीभत्ससंभवाः । आवेगो जडता मोहो मर्षणं विस्मयः स्मृतिः । इति भावा निबोद्धव्या रसज्ञैरद्भुते रसे । दैन्यं चिंता तथा
ग्लानिर्वैदनिर्वेदो जडतास्मृतिः । व्याधिश्च करुणे भावा वाच्या भावविशारदैः । हर्षोसूया तथा गर्व उग्रो । त्साहो मदरश्च । चा
पल्यमुग्रता चैव रौद्रे भावाः प्रकीर्तिताः । अमर्षः प्रतिरोधश्च वितर्कोथ मतिर्धृतिः । क्रोधोसूयाय संमोह आवेगश्चोपमर्षणं ।
जर्वो मदस्तथोग्रत्वं भावा वीरे भवंत्यमी ॥ रसः सर्वोपि निःशृंगा स्तिरोधत्ते रसांतरमिति । भारतीवोक्तप्रक्रियया पापघ्ये क एव रसस्त
थापि महाकविप्रसिद्ध्या रससंकरः स्वीक्रियते । अत्र रसादेरप्राधान्ये रसवदाद्यलंकारा भवंति । रसनिबंधे रसवदलंकारः । भावनिबंधे प्रे

यो लंकारः। रसाभासभावाभासनिबंधे ऊर्जस्व्यलंकारः। भावशांतिनिबंधे समाहितोलंकारः। तथा भावोदयो दयोपि। एतद्रसवा
रसर्वस्वे प्रपंचेनोक्तं। रसभावतदाभासतत्प्रशमानां निबंधने रसवत्प्रेयऊर्जस्विसमाहितानि। भावोदय भावसंधि भावशब
लात्वाश्च पृथगलंकाराः इति। एतेषामुदाहरणमलंकारमकरंदे भविष्यति। गुणालंकारस्त्रीकृत परिकरो भाव विभव स्फुरन्मा
दुर्भावः क्रमगलितवेद्यांतरम — सुखदुःखवानिविडद्रुद्यतिप्रेनोः सहृदयैः समानंदात्मा परिणमति पूर्णो रसभरः। रसो वा स्मार्थः
सन्निलसातिपदार्थाः पुनरमी विभावाद्याप स्मिंक्किलदधति विश्रांतिमुचितां। ततो भावारब्धक्रमसमुदितान्योन्यविभवा रसीभा
वं बिभ्रत्यथ च पटतां तंतव इव। भावेष्वापि निवर्धमान विभवैरप्यादिकैः सिंधुवत्कल्लोला इव संभवंति विलयं चायांति भावा
मुहुः। निर्वेदाद्युपभोगभावितनिजास्वादातिरेको रसो लोके स्यादनुकार्य एव कथितो लोकेऽसामाजिके॥ ॥इतिरसप्रक

शिव

रणं॥ ॥अथ काव्यजीवितनिरूपणानंतरं तदुपस्कारहेतूनां गुणानां सम्यग्विवेकाय दोषा निरूप्यंते। तत्र दोषसामान्यलक्ष
णं। दोषः काव्यापकर्षस्य हेतुः शब्दार्थगोचरः। शब्दार्थगतत्वात्काव्यस्य तदपकर्षहेतूनामपि दोषाणां शब्दगतत्वेनार्थगतत्वेन
च द्वैविध्यं। शब्दगतानामपि पदवाक्यगतत्वेन द्वैविध्यं। तत्र पदगता दोषाः कथ्यंते। अप्रयुक्तमपुष्टार्थमसमर्थं निरर्थकं। नेया
र्थं च्युतसंस्कारं संदिग्धं चाप्रयोजकं। क्लिष्टं गूढार्थकं ग्राम्यमन्यार्थं चाप्रतीतिकं। अविमृष्टविधेयांशं विरुद्धमतिकृत्तथा। अश्ली
लं परुषं चेति दोषाः समदश स्मृताः॥ ॥एषां कारूपं निरूप्यते। यदप्रयुक्तं कविभिरप्रयुक्तं तदुच्यते। प्रकृतानुपयुक्तार्थमपुष्टा
र्थं तदुच्यते। योगमात्रप्रयुक्तं पदमसमर्थं तदुच्यते। पादपूरणमात्रं यत्तदनर्थकमुच्यते। स्वसंकेतप्रसिद्धार्थं नेयार्थमपदिश्यते। शा
ब्दशास्त्रविरुद्धं यच्च्युतसंस्कारमिष्यते। संदिग्धं तन्मतं यस्मात्संदिग्धार्थप्रतीतिकृत्। तदप्रयोजकं यस्मादविशेषविधायकं। क्लि

कं तदर्थावगतिर्दूरादापततो भवेत्। अप्रयुक्तमप्रसिद्धार्थे गच्छार्थं परिकीर्त्यते। पामरैकोपलभ्याय: प्रसिद्धं ग्राम्यमुच्यते। यदूपि
५४ प्रस्थितं नाम तदन्यार्थमुदाहृतं। शास्त्रमात्रप्रसिद्धं पदमप्रतीतं तदुच्यते। अविमृष्टविधेयांशं गुणीभूतविधेयकं। विपरीतार्थ
धीर्यस्माद्विरुद्धमतिकृन्मतं। अश्लीलं त्रिवदमंगल्यंजुगुप्साव्रीडभीकरं। परुषं नाम तद्यत्स्याद्विहितं परुषाक्षरैः॥ ॥अत्र व
न हृन्नीनां शत्रुस्त्रीणां वचने पुदोषा उदाह्रियंते। अप्रयुक्तं यथा॥ विमुखा देवताः सर्वे नस्ते दुष्यवनादयः। अत्र रसाग्रहमे
भिन्योऽपि विपहतं कल्पिताः। अत्र देवता इति दैवतशब्दपुल्लिंगप्रयोगः। दुष्यवन इतीन्द्रपरत्वेन कविभिर्नप्रयुक्तः। अपुष्टार्थं यथा।
कर्भाषाधर्धवाहनाममीषामीदृशी दशा। कथं सहाम हे विधे। ० श्रिकंठिनं हतजीवितं। अत्र र्व्यथ्यबाहुहय्यानामिति विवक्षितेन शिव
षार्धाधर्बाहनामिमनुपयुक्तं एतदेवाविमृष्टविधेयांशस्योदाहरणं। बाहुर्हयस्य वै यथेति विधेयेतस्योपसर्जनत्वं प्रतीयते। अत्र समं

यथा ॥ विहायवृत्तमुधामेनांचतुरंबुपराहतां । कनुगंतमम स्माकमरणेप्यमुखास्थितिः । अत्र जलनिधिपरत्वेनांबुधरपदमस
मर्थं । अत्र नर्थकनेपार्थमुक्तसंस्कृति सदिग्धानि यथा ॥ विहायवगृहांस्त्वानैवयत्मत्तेनवहृत्तमः । कदा भविष्यते वासः कटकेषु
महीभृतां । अत्र त्वदेशेति निरर्थकं । व्यत्यस्तनवशब्देनवनप्रतीतिस्वसंकेतमात्रापन्नेति नेयार्थं । भविष्यतइति भवतेरास्तनेप
दित्वं शब्दशास्त्रविरुद्धमिति च्युतसंस्कृतिः । महीभृतां कटकेषु वा इसने नराज्ञां नगरेषु वासउत पर्वतानां नितंबेष्विति संदे
हात्संदिग्धं । अप्रयोजनविकिष्टं यथा ॥ हंतवनीमहेवजन्नघट्टनोत्माखलात्मसे ॥ नमस्त्वद्दशनारातिर्ध्वजागन्नजविरोधिषुः । अत्र
न नमस्त्वद्दशनाः सर्पास्तेषां मरातिर्गरुडः स ध्वजे यस्येति विष्णुस्तस्याग्रजइंद्रस्तस्य विरोधिषु पर्वतेष्वित्यर्थप्रतीतेरे
तिदूरत्वात्क्लिष्टं । पर्वतेषु वर्तनं दुःखावहमिति प्रकृतेवजन्नघट्टनात्माकुबजात्मेस्ति ति पर्वतविशेषणस्यानुपयुक्तत्वाद

प्रयोजकं। गर्भार्थं ग्राम्यार्थौ। नियथा। शोणिताज्वहृशः कामं क्षामगल्लकटस्थलाः। विदग्धहृदयाः शोकवह्निना राज
कन्यकाः। अत्र शोणितशब्दस्य रुधिरे प्रसिद्धस्य पाटलवर्णपरत्वेन प्रयोगाद्गूढार्थं। गल्लकटिशब्दौ कपोलजघनपरत्वेन
ग्राम्यप्रयुक्तौ। विदग्धहृदया इति विशेषणं विशेषेणादग्धहृदयस्य वाचकत्वादन्यार्थं। अप्रतीतिकं यथा। मन्त्रूपदेशाः कृतगताः
कुलाचार्यैर्हृदीरिताः। अत्र मनुशब्दो मंत्रपरत्वेन मंत्रशास्त्रमात्रप्रसिद्धत्वादप्रतीतिकं। विरुद्धमतिकृद्यथा। अविकारमरण
स्यां द्विषे वा व्यर्थाभवेत्कथं। राज्ञामकार्यमित्राणां विनाशं समुपेयुषां। अत्राविकारमरणशब्दाभ्यामन्त्यसंभोजकारिणः प्रती
तिः। अकार्यमित्रशब्दादकार्येषु मित्राणीति प्रतीतिः। वियोगदुःखपरतया प्रयुक्ताद्विनाशशब्दान्नाशप्रतीतिरिति विरुद्धम शिव
तिकृत्। अमङ्गलव्रीडाजुगुप्साप्रतीतिकरं त्रिविधमश्लीलं यथा। अभिप्रेतपदावाप्तः कदा नः संभविष्यति। वीचं साधनमेते

षां परोत्सर्गे पञ्जीविनां। अभिप्रेतपदार्थवाचकशब्दात्मेतल्लोकावाचकप्रतीतेरमंगलत्वं· साधनं नीचमिथ्यनेनकृच्छमेहनप्रतीतेर्व्रीडाकरत्वं·
परोत्सर्गैकजीविनामित्यनेनाधोवायुप्रतीतेर्जुगुप्साकरत्वं· पवस्नं पथा· कुतः कान्तारहूतीनां कातर्थ्यार्थित्वमत्तिनः। अत्रकाती
र्थ्यार्थित्वमित्तिनः अत्रकातीर्थिपदप्लवर्णारस्वस्त्वं॥ ॥ अथ वाक्यदोषाः। शब्दहीनं क्रमभ्रष्टं विसंधि पुनरुक्तिमत्। व्याकीर्णं वा
क्यसंकीर्णमपूर्णं वाक्यगर्भितं। द्वे भिन्नलिंगवचने द्वे चन्यूनाधिकोपमे। भग्नछंदो यतिभ्रष्टमशरीरमरीतिकं। विसर्गलुप्तम
त्वसमासं वाच्यवर्जितं। समाप्तपुनरात्तं च तथा संबंधवर्जितं। पतत्प्रकर्षमप्रसिद्धपदप्रक्रमभंगवत्। चतुर्विंशतिरुक्तं ते दोषा वा
क्यसमाश्रिताः॥ ॥ एषां स्वरूपमुदाहरणं च। अपशब्दहतं वाक्यं शब्दहीनं प्रकीर्तितं। शत्रुंगाक्षेप्सु। नसंभवत्यडुमहे हं तहि समा
धेर्निमन्त्रितं। येन काकुत्स्थमभर्तुः सेवां हि त्वाहताव पं। अत्र हितं न संभवत्यडुमह इति पदद्वयप्रयोगे दोषाविष्काराद्वाक्यमेव दुष्ट

५५ पितिनपददोषशंका। संपूर्वस्य भ्रंशो ते रात्मनेपदत्वे कर्मणो नुपादाननियमात्। अथ क्रमभ्रंशं॥ क्रमभ्रष्टमेवदार्थः शाब्दो वा
पक्रमः। प्रभवे का कांती ड्वापतुरगा न्कारिणो यथा। उपायनमकुर्वणां वयं देवेन वंचिताः। अत्र कारिणो यद्वा तुरगा निति वक्त
व्येषु कर्मणो क्त। तुरगापेक्षया कारिणा पदस्य क्रमभ्रष्टत्वात्। अथवाकारिणा इत्यर्थे क्रमभंगः। शाब्दक्रमभंगो यथा। कानामग
णानामस्मात्सुकाव्यतीपस्य भूपतेः। यशः प्रतापयोर्मध्ये सूर्याचंद्रमसावपि। अत्र यशः प्रतापयोरित्यंड्रसूपैर्मग्नाविति श
ब्दक्रमेउच्चिते तथान्नोक्तं। यशः प्रतापयोरित्सूर्याचंद्रमसौ मग्नाविति समुदायपद्यान्वये यथायोग्यमर्थान्वये सिद्धे नार्थ
क्रमाविरोधः। अपितु शब्दमयो एव क्रमभंगः। अथ विसंधि॥ विसंहितो विरूपो वा यस्य संधिर्विसंधिमतः। यथा॥ शोभीतीई
हशान्यासन्नूपच्चैव्यर्थे कवागतं। अत्र शोभी ति ई ह शानी तिविसंधिः। एचैव्यर्थे इति संधिवैरूप्यं। अथ पुनरुक्तिमनाश शिव

द्वार्थयोर्न लक्ष्येत तु न ह्यवाक्यं पुनरुक्तिमत्। यथा। जीर्णकाननसंकीर्णो विधेः काननरूत्तयः। अत्र काननसंकीर्णो काननरूत्तय
इति पुनरुक्तं। अथ व्याकीर्णं। व्याकीर्णं तद्धि भक्तीना व्याकीर्णं तु मिथोन्वये। यथा। सुरलोर्थिनाम हीपाला वृतर्धं काकती
शितुः। आज्ञां मुरसि बिभ्राणाः शिरसि क्रोडमुद्रिकां। अत्र क्रोडमुद्रिका मुरसि शिरस्याज्ञां बिभ्राणा इति संबंधः। अथ
वाक्यसंकीर्णं वाक्यान्तरपदैः कीर्णं वाक्यसंकीर्णमुच्यते। यथा। मानेन महता स्मामिर्दनेव — नतिषु तां विध्यस्य जीवि
तं तन्ने ज्ञातमयत्नसाकृतं। अत्र महता मानेन पञ्चाणांव — नरु तं तदयुविध्यस्य वनेतिषु तां नो जीविन मिति वाक्यद्व
यपदानामन्योन्यसंकीर्णता। अथाघूर्णं। त्याघूर्णं तिद्वेधत्र न संपूर्णः क्रियान्वयः। यथा। शैलच्छस्याकमावासे
वन्येः सोच्छ्वसिता वयं। मृगेर्बन्धुमतभ्रान्तस्मान्वयपेन्धी तां प्रमोदतां। अत्र शैलवासान्वन्यहृत्ती न्यगबोधवान्यप

न्निति विवक्षितः संबंधोन संपूर्णः। अथवा वक्तृगर्भितं। तद्वाक्यगर्भितं। तद्वाक्यगर्भितं यस्य मध्ये वाक्यांतरं भवेत्तथ
था। ज्ञात्वाप्यंधेन रेंद्र स्य क्रोधाग्निमतिदुःसहं। यद्यानलंघ्यते दैवं तस्मिन्निपतिता वयं। अत्रातिदुःसहं क्रोधाग्निं ज्ञात्वापि
तस्मिन्वयं निपतिता इति वाक्यमध्ये यदा नलंघ्यते दैव। मिति वाक्यांतरमनुप्रविष्टमिति वाक्यगर्भितत्वं। यत्रोपमा भवे
द्भिन्नवचनाभिन्नलिंगका। तद्भिन्नवचनं भिन्नलिंगं चाहुर्मनीषिणः। तयोरुदाहरणं। समुद्रा इव गंभीरं मनो यादव
भूभुजः। गिरिणो वाभ्रनपाति हे। श्रियावक्तुषीकृते। अत्र समुद्रा इव गंभीरमिति भिन्नवचनं। गिरिरौ वर्धं जिस्रामिति भिन्नलि
गं। यत्रोपमानमधिकं न्यूनं वा स्यात् द्विशेषणैः। अत्राधिकोपमं न्यूनोपममतः परं। यथाक्रममुदाहरणं। क्षामक्षा
ममुखा ८ कांताः कामनेमानवेशितुः। ग्रीष्मेनद्य इव म्लानपयोमलाविलाः। अत्र क्षाममुखानां कांतानां मुप

मानमकृतास्मुमदीयुस्त्वानयप्रस्मात्त्वंवक्तव्यं स्नानोत्पलविसाविलाइत्याधिकं। न्यूनो मैवमं यथा। सर्वतोनिर्झराकी
र्णविभीतिधरणीभृतः। अत्र हार स्थाने निर्झरा उक्ताः। अंगरागस्थाने कि + हारांगरागस्तुभगानगरे पुवर्पं यथा। +
मपिनोक्तमितिन्यूनोपमानत्वं। अथ भग्नछंदो यतिभ्रष्टे छंदो भग्नं वा चोपन्नेन भग्नछंदस्त्वमुक्तं। यतिस्थाने यतिभ्रंश शास्त्र
यतिभ्रष्टमुच्यते। यथा। विद्याधरराये कृतकुटुंबरक्षणास्य किं भद्रं भवति जनस्य माहृश्यस्य। अत्र विद्याधरपदे यति
तीपदवर्णे यतिभंगः। पदांतेस्थवर्णस्य गुरुत्वाभावाच्छंदो भंगः। अथाशरीरं। क्रियापदेन रहितमशरीरं प्रकीर्त्यते।
यथा। हंतनिष्कहृणो धाताक्रीडतो मस्ति कहि मे। क्रीडत्तो काननेकंटकाकीर्णे स्थितान्यां द्रुशिशून मन्तु।
अत्र क्रियापदं न विहितं। एतदेवानन्वयास्यदूषणां। अथारीतिकं। रसानानुगुणारीतिपञ्चारीतिकमुच्यते। यथा।

अरवर्वेगर्वदुर्वारदोरर्गलानिरर्गलाः। हा बंधुवर्गाः सर्वेपि हतां तास्तिथपः कृताः। अत्र करणोऽन्तु। चेतं वर्णाडंबरं। अथ विसर्गलुप्तं।
आहतं लोपो विसर्गः स्यात्स कृत्स्नलुप्तविसर्गकं। यत्र विसर्गबहुधाश्रो तं लोपो वा प्राप्तो स्तित द्विसर्गलुप्तं। यथा। कथं मनोरथो
जातो जातो वासो ध्रुवो मरौ स्त्रामाद्री नाहता जीरागिवनोते ष्वीहृ शावपं। अथास्थानसमासं। अपदस्थसमासं तत्समासे
यत्र नोगविभुः। यथा। कुतो वै मुरव्यमस्मास्तु शस्यारागः परूपात्मनः। इत्सुदग्वतरम्नास्मड्डुकुटीकुटिलाननाः। अत्र वेधसे क्रुध्यतां न
पारागामुक्तौ न समासः किंतु कविवचने समास इत्य पदस्थसमासः। अथ वाच्यविवर्जितं। नोक्तं स्याद्यन्नवक्तव्यं तदाहुर्वाच्यवर्जितं। य
था। दुर्दशां प्रतिपन्नानामस्माकं जीवितं मतं। अत्र दुर्दशां प्रतिपन्नानामपीत्यपिशब्दे वक्तव्ये नोक्तः। अथ समाप्तपुनरात्तं प्रतत्प्रक शिव
र्षे। समाप्यपुनरादाने समाप्तपुनरात्तकं। प्रतत्प्रकर्षं स्त्रीहुः प्रकर्षो यत्र विश्लथः। द्वयोरुदाहरणं। धावन्नग्रे पुसं म्नाम्पत्क रिपुघात्त

रक्ष्यस्य प्रभु। विंध्यारराये पुति छ्याम: क्षुभ्यद्द्रुत्नक्रपाटि:। पुत्र अत्र विंध्यारराये पुतिष्ठामर्शति समाप्य क्षुभ्यद्द्रुत्नकपाटि: स्थिति पुनरा
दानात्समाप्तपुनरात्तकं न यान्नाम्यक्रकरिष्यत्तर क्षुभ्यत्प्रभावन्नगोष्ठि तिवहूक्ष्येन तथोक्त मिति पत्तत्प्रकर्षता॥ अथ संबंधव
र्जितं। संबंधवर्जितं तत्स्याद्यत्रेष्टो नान्वयो हतः यथा। मद्रासनानिदपदः छत्राणि च महीरुहाः। दुर्द्दशाराज्यमधर्मेभिषिक्ताः पु
नरहो वपे। अत्र राज्ये मद्रासनानि हृषदः स्मादि संबंधो नोक्तः। अथाधिकपदं। यत्राधिकपदोक्तिः स्यात्तत्राधिकपदं मतं। यथा।
विमुक्तावल्लभैरेतावनीते गुर्जरस्त्रियः। सुधांशुमंडलाकाररूपक्रमा विपांडुराः। अत्र सुधांशुपांडुरा इत्येतावता परिपूर्णोर्थे सिद्धे मं
डलाकाररूपक्रम इत्यधिकं। अथ भग्नक्रमं। प्रक्रांतनियमत्यागे भग्नप्रक्रममिष्यते। यथा। गृहाग्रहासौशवरावीधवा
विध्वस्ताः पुरी सरितादीर्घिकाः कष्टमाक्रीडाः काननानि च। अत्र बहुवचनतया प्रक्रमे विध्वस्ताः पुरीत्येकवचनं क्रमभग्नं ॥ ६२

47

अथार्थदोषाः ॥ अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमं । भिन्नं चैवातिमात्रं च परुषं विरसं तथा । हीनाधिकोपमे स्यातामसदृक्षो
पमं तथा । अप्रसिद्धोपमं हेतुशून्यं चैव निरलंकृति । अश्लीलं च विरुद्धं च तथा सहचरच्युतं । एवमेकादश प्रोक्ता दोषा अर्थसमाश्रयाः ॥
एषां स्वरूपमुदाहरणानि च । समुदायार्थशून्यं यत्तदपार्थं प्रकीर्त्यते । यथा । कृतः शुष्पदपोनद्धः कावातां चोलमंडले । फलगः सहस्रंशो
पस्मारः कतिकुलाचलाः । अत्र न मनाक्किद्वाक्यार्थः प्रतीयते । प्रयोजनशून्यं स्यात्तद्व्यर्थं परिकीर्त्यते । निर्मलं कुलमुद्दलं शौर्यं दःप्र
थितं परैः । किमिति संधूयते पादपीठं पांशुनसेव्यते । अत्र निर्मलं कुलमित्यादि प्रशंसा सेवाकर्तव्येत्युपदेशोऽनुपयुज्यते । अथैकार्थं ॥
उक्ताभिन्नार्थकं यत्स्यादेकार्थं तन्निगद्यते । यथा । दिशीर्णाशा न धावेतो मूर्छितान्वीक्ष्य बालकान् । शिरस्त्विचेतनानन्दषद्वाखं
डितं लवशो मनः । अत्र पूर्वोत्तरार्धयोरभिन्नार्थत्वं । अथ संशयः । वाक्यार्थसंशयो यत्र तत्संशयवदिष्यते । यथा । करकुंभौ स्तनावद्य शिव

जयेतां क्षामतां गतौ । लतावपुःश्रियः स्त्रीणां हंसं तु म्लानतां गताः । अत्र करिकुंभयोः स्तनयोश्च लतानां वपुःश्रियां च कर्दकर्महंसंदेहः ।
अथापक्रमं । पत्रहवा परामाव विहतिस्तदपक्रमं । यथा । हंतव्यादापव— रिणि निद्रांतं तदेरणां श्रियः । तस्यैव तत्स्य तितैर स्मान्निंहयम्स्तथा
क्रमं । अत्र निद्रान्तरकालमाविर्भावमुखव्यादानस्य पूर्वकालत्वमुक्तमित्यपक्रममेतत् । अथ खिन्नं संबंधवर्जितं यस्मात्तत्खिन्नं परिकी
र्तितं । यथा । नूनमंभालेषु लाटानां नयात्रा लिखिता लिपिः । यद्रक्ताकं कुटुंबानि विषीदंति मरुस्थले । अत्र मरुस्थले निवासवि
भारस्य भालगतलिप्यभावस्य च न संबंधः । अथातिमात्रं । यत्सर्वलोकातीतं तदतिमात्रं प्रकीर्तितं । यथा । मा भूदेकार्णवं वि
श्वमिति संकोचितांबुभिः । अरोपहराणां नारीभिरसंख्यानि नगाः कृताः । अत्रांबुभिर्जगदेकार्णवमित्याद्यत्युक्तिः । अथप
रुषं · अतिक्रूरार्थसहितं परुषं परिकीर्तितं । यथा । दावानले वनं सद्यः क्षिप्यताममकारट्टमे । अत्र फलानि पाचमानान्निशनु

48 द्विरुपात्तिपरत्वोक्तिः। अथ विरसं। अप्रस्तुतरसं यत्तद्विरसं परिकीर्त्यते। यथा। चंद्राननैः कटाक्षैर्नः पश्यतामस्तवर्षिभिः। शोचि
तालमिति क्लिष्टः किरातैर्भ्रष्टो लसुभ्रुवः। अत्र पुरुषवियोगखिन्नानां वनचरैः संभोगप्रार्थने विरसं। अथ हीनोपमं। हीनं चेदु
पमानं स्यात्तद्धि हीनोपमं मतं। यथा। शुनकैरिव सारंगा भवद्भिर्निहता हताः। कुगतं पौरुषं सद्भिः कानने कनिवासिनां। अत्र शुन
कैरिव भवद्भिरिति हीनोपमा। अथाधिकोपमं। यत्रोपमानमधिकं तद्वेदधिकोपमं। अयथा। अमी शारे सुरस्त्रीरं बकानिश्च
लमस्तपयः। महर्षिपदवीमस्माभिरध्यासोपद्रवाः कृताः। अत्र बकानां महर्षिपदवैः साधिकोपमा। यदतुल्योपमानं तद्वेदसदृशोपमं। ए
कविंध्यावलसांद्रकुंजोज्ज्वलितनिर्झरः। भालेक्षणगस्फुरद्वह्निशिखाटोपदैत्यवरः। अत्र कुंजोज्ज्वलितनिर्झरस्य विंध्यस्योपमाने
र्भालेक्षणगस्फुरद्वह्नेरीश्वरस्य मिथो न साहश्यं। अथ असिद्धोपमानं यथा। अप्रसिद्धोपमानं यदप्रसिद्धोपमं मतं। यदा बुरविचन्द्रनेत्रा रिव

णीमुखाब्जं गमग्गी दृशां । हिमदूषितपद्मानि कुमुदानीव नि-- अत्रमुखानां कुमुदान्युपमानतया कविलोके न प्रसिद्धा
नि हि तानि । विनार्थकथनं हेतुशून्यमेव वक्ष्यते । मुधा नु धावनं जातं मार्गे हि मौक्तिकां तिके । अन्वेष्टुम्यतो नापि पदवीं वंन सु
भ्रुवः । अत्र सुभ्रुवः पदवीं पन न भवतीत्यत्र हेतुर्नोक्तः । अथ निरलंकारः । अलंकारः । अलंकारेण रहितं निरलंकारमिष्यते । यथा ।
आघ्राय सुरभेर्योनिमुन्मुखे दीर्घमेहनैः । महोक्षैर्लंबमानांडैर्विषुग्व्याकुलितं वनं । अत्र न कश्चिदलंकारः । भाषाविशेष
णाभावात्स्वभावोक्तिः । अश्लीलार्थस्य कथनमश्लीलं परिकीर्त्यते । अस्यापि पुरोदाहरणं । विरुद्धदेशकालादि विरुद्धं ब
हुधोच्यते । यथा । दृश्यन्ते रसना नेदीपानुद्धे लोलवराणां बुधैः । मरुदेशे च गंगानः पिपासाशमयिष्यति । उत्तरस्यादिशि न
वराणीव इति दिग्विरोधः । मरौ गंगेति देशविरोधः । अत्र रसापमहिको दग्नविपाशोदरजन्मनां । महत्यर्द्योपि मुक्तानां ह्विपे मुक्ता

49 विभूषणाः।अत्र माहिषविषाणेभ्यो मुक्तानां जन्मेति लोकविरोधः।सर्वं विहायं नरमुदाहार्यं।अथ सहचरभिन्नषामतं सहचरभिन्न
षमतुल्यानां निबंधने।यथा।शांत्याश्रुतं ह्रिया नारीममध्ये नरतो त्तवः।श्रुते न षिषणाद्वयमहस्याजीवं तिशान्नवाः।अत्र श्रुतधि
षणाभ्यां नारीरतोत्तवयोरपकृष्टत्वात्सहचरभिन्नत्वं।एवं दोषांतराणि यथासंभवमुदाहार्याणि।रसभावानां स्वशब्दवाच्यता
दुष्टैव॥ ॥इति दोषप्रकरणं॥ ॥अथ गुणा निरूप्यंते।श्लेषः प्रसादः समता माधुर्यं सुकुमारता।अर्थव्यक्तिरुदार
त्वं तथा कांतिरुदात्तता।ओजः सुशब्दता प्रेयानूर्जस्वि समयविस्तरः।समाधिः सौक्ष्म्यगांभीर्यं संक्षेपो भाविकं तथा।सं
मितत्वं तथा प्रौढी रीतिरुक्तिर्गतिस्तथा।एतेषां मध्ये केषांचिद्दोषपरिहारकत्वेन गुणत्वं। केषांचित्स्वत एवोत्कर्षहेतुत्वाद्गु शिव
णत्वं।तत्र केचित्स्वत एव चारुत्वादिहेतवस्ते परमुत्कृष्टाः।दुष्टिपरिहारहेतुत्वेन गुणत्वं न सर्वैः संमतं।येतु दोषाभावतयापि गु

रात्वमिच्छंति तेषामेव सौकुमार्यादयो गुणत्वेन संमताः। श्रुतिकटुदोषनिराकरणाय सौकुमार्यं मतं। ग्राम्यदोषनिराकरणाय
कांतिः स्वीकृता। अपुष्टार्थनिराकरणाय व्यक्तिर्मता। न्यू नाधिकपदनिराकरणाय सं मितत्वं मतं। अनुचितार्थनिराकरणा
यौदात्तता मता। विसंधिनिराकरणायौर्जित्यं मतं। पतत्प्रकर्षनिराकरणाय रीतिरिष्टा। क्लिष्टपरिहाराय प्रसादो मतः। अश्लील
२। परिहारार्थं मुक्तिः स्वीकृता। च्युतसंस्कृतिपरिहारार्थं सौशब्द्यमिष्टं। प्रक्रमभंगनिवृत्त्यर्थं समता मता। परुषनिराकरणार्थं
प्रेयो मतं॥ एवं यथासंभवं केषांचिद्दोषपरिहारत्वेन गुणत्वं॥ ॥एषां गुणानां स्वरूपमुदाहरणं च॥ मिथः संश्लिष्टपद
ताश्लेष इत्यभिधीयते। बहूनां पदानामेकपदवद्भासमानत्वं श्लिष्टत्वं। यथा। श्रीमत्काकतिवीररुद्रमखिलक्ष्मापाल
मौलिस्फुरन्माणिक्यद्युतिरंजितांघ्रिमखिलप्रख्यातिशौर्योदयं। विश्वत्राणविनिद्रमक्षयगुणज्योत्स्नावितानावृत

50

व्योमागारमनल्पवैभवमसुं स्तोतुं वयं नेश्महे॥ अत्रपाठसमयेपदानोमेकपदवत्प्रतिभाससमानताश्लेषः। अथ प्रसादः। प्रसिद्धार्थ
पदं यत्तत्प्रसादो निगद्यते। यथा। प्रतापरुद्रदेवोयं भाति लक्ष्मीपतिः स्वयं। येनास्य लोचने फुल्लपुंडरीकमनोरमे। अत्र प्रसिद्ध
र्थसमर्पणात्प्रसादः। अथ समता। अवैषम्येण भणितं समता सा निगद्यते। यथा। वदान्यतरुमंजरीसुरभयः श्रवःपारणांगु
चातुरी णाविदधते सतां जगति वीररुद्रप्रभोः। सुधामधुरिमाधरीकरणांबंधविषयस्वरनतरंगिणीविहरदूर्मिमर्मस्पृशः। अत्रपा वो
दचतुष्टयेपि तुल्यबन्धत्वात्समता। अथ माधुर्यं। यापृथक्पदता वाक्ये तन्माधुर्यं प्रकीर्त्यते। यथा। यशःश्रियः काकतिम
पतेर्दिशां नितंबबिंबेषु दुकूलरीतयः। उरोजयोर्मौक्तिकहारविभ्रमाः शिरःसुजातीकुसुमस्रगुज्ज्वलाः॥ अत्रवाक्ये शिव
पाठसमयेपि पृथक्पदत्वप्रतीतेर्माधुर्यं। अथ सुकुमारता। सुकुमाराक्षरप्रायं सौकुमार्यं तदुच्यते। सुकुमारत्वं नाम समानुस्वा

दानं रकोमलवर्णहंसाश्रमंदं निष्पंदमिष्वंदसुंदरीवदनांबुभिः। नगरे काकतीन्द्रस्य दिवाप्याभाति चंद्रिका। अथार्थव्यक्तिः। यत्तु संपू
र्णवाक्यत्वमर्थव्यक्तिं वदंति तां यथा। भाग्यं महन्मलोकनिद्राम धुनायेनास्य संरक्षिता जातः। खेलति वीररुद्रनृपतिर्निः
सीमशौर्योदयः। प्रहात्री सा प्रविविध्यानि दधते धन्यस्य संशोहरेर्य त्सा सादवतीर्य काकतिकुलेस्वैरं समुज्जृंभते। अत्रार्थप्र
तिपादनेर्वक्यस्यान्यनिराकांक्षतया परिपूर्णत्वादर्थव्यक्तिः। अथौदार्यं। विकटाक्षरबंधत्वमौदार्यं चेष्यते बुधैः। यथा।
ध्यी जगद्दाभयंपातिमांसप्राय्यं हमहे मि कयावहु गोष्ठ्यान्स पीत्याम तत्स्वो हैस्तरांस्तुद्रूपराभव स्फारौद्राग्नरदं ष्ट्रान। सं कट
टा लिमज्ञातः क्षपायैर्नृद्विपकालितवशा निर्भरंतर्नदीर्यौनकुर्वत्साध्योधनोव्योम यमवनिमतामर्ध्रसैन्येनसष्टाः। अ
थ कांतिः। अत्युज्ज्वलत्वं बंधस्य काव्ये कांतिरितीष्यते। यथा। जेतुः काकतिवीररुद्रनृपतेर्निःसीमविश्राणनश्लाघाले

(र्गतां३) ह्वा२ स्थ्यु३

घ्नितकल्पपादपगुरा प्रौढमता पञ्चियः। बिभ्रच्छारदकौमुदीपरिमलं सामंतसीमंतिनीगीतोद्भोगनिरूढपांडिमधुरं धत्ते यशः। डा
प्रावशः। अथौदात्तता। श्लाघ्यो विशेषणयोगो यो जायते तु सा स्यादुदात्तता। यथा। हंहमाराणगजाकीर्णे मादि। अथौजः। ओजः
समाससंभूयस्त्व। यथा। उद्दामद्विरदोद्धदानलहरीसौरभ्यलोभभ्रमद्भृंगश्रेणिनिबद्धकोलाहलतिकलावाचालितप्रांगणाः। डां
नि:सीमप्रथमानमूर्मविभवारंभप्रियंभावुका मोदंते भुवि वीररुद्रनृपते विद्वद्गृहश्रेणयः। अथ सुशब्दता। सुपांतिङां
च व्युत्पत्तिः सौशब्द्यं परिकीर्त्यते। यथा। आशामंडलकूलंमुद्गहकथैरभ्रंकषैर्वैभवैरक्षन्नुम्भजसः प्रजा स्त्रिभुवनक्षेमं
करप्रक्रियः। उन्मूलं प्रविधिनिग्रहंतुमतुलैराक्रम विष्णुर्गुरौ मर्म्मासं चरते यकाकातिकुलेरुद्धावतारो हरिः। अथ प्रेयः। शिव
प्रेयः प्रियतराख्यानं चाटूक्तौ यद्विधीयते। यथा। दाक्षिण्यपंतत्र पिदक्षता च पिदयात्वंयनुन्नतेतत्वयि प्रागल्भ्यंत्वयि

पो हृद्यं चाधिकतां सं प्रचयिभ्यो स्तवयि । औदार्यं चाधिकधीरता चयिजगद्धौरेयता च चाभिश्री मन्त्राकृति नाथपालयमुवं
वैरिविके न्यायान्धं वं । अथा जित्यं । श्री जित्यगा ॰ ब्वत्वं प्रथा । क्षोणी रक्षणाद् क्षिराणाः क्षतजगत्क्षोभाद् दुरीक्षक्रमाः क्ष
द्र क्षत्रियपक्षशिक्षणा विश्वोमोक्षम कौक्षेयकाः । उद्दामो घमनस्य हृदुन्नपतेः दोर्दण्डकोश्शं स्याग्रजैर्दुर्जनगर्वपर्वतभि
द्दादंभोलयः केलयः । अथ विस्तरः । समर्थनमपूर्वं चोक्तिरुक्तस्यार्थस्य विस्तरः । यथा । लोके भुवि त्रिषु काकतीश्वर गुणानन्तो
तु मुहुर्वीक्षितुं श्रोतुं वक्तुमिन्दिं तुं च फणी नामेकः क्षमो नायकः । यद्वक्त्राणि सहस्रमस्य कृतिनो यद्वै सहस्रे दृशा श्रोत्राण
व श्रुतयः फणा दशशतान्यस्य द्भुतां दोजने । अथ समाधिः । समाधिरन्यधर्मस्य यदन्यत्राधिरोपणं । यथा । एकैकान्ती दुग्धसिंधुं
कुशलमनुसरंत्यादराद्यां करांद्रिं चाद्रुत्या मानयंती मुहुरमरनेंद्रीचंद्रमन्वेह संतीवे धात्रीं या नह सावलिमनुक्रमप्यास्वागतं

52 व्याहरंती लोकं पुत्रि घमीपुप्रभवति महती रुद्रदेवस्य कीर्तिः। अथ सौक्ष्म्यं। अंतःसंजल्परूपत्वं शब्दानां सौक्ष्म्यमुच्यते। यथा॥
ः४१ अध्यधः परिसंक्षिप्तं क्रमधातवस्तथा। वर्तते काकतीवंशे देवर्षयत्र कर्मसि। अत्राधितिष्ठत्यधः करोति परिभवती संत
संजल्परूपत्वात्सौक्ष्म्यं भवति। अथ गांभीर्यं। ध्वनिमत्तातु गांभीर्यं। यथा॥ विभिं कौक्षेय केगंगाकीर्तौ दिग्वसनं पिपो। रुद्रमु
खेचरुद्रस्य काकतीयस्य दृश्यते। अत्र गंगारस्य कंठे विषं मौलौ गंगा कटिस्थले दिग्वसनं शिरसि चंद्र इति ध्वनिमत्ता। अथ संक्षेपः। सं
क्षिप्यार्थाभिधानं यत्संक्षेपः परिकीर्त्यते। यथा। वंशोस्ति काकतीयानां तत्रासन्बहवो नृपाः। तेषां भाग्यविवर्तोयं वीररुद्रनरेश्वरः॥
अत्रानतिविस्तरकथनयोग्यार्थस्य संक्षेपोक्तिः संक्षेपः। अथ भाविकं। भावतो वाक्यवृत्तिर्या भाविकं तदुदाहृतं। यथा॥ शिव
मो स्वामिन्नृतानतकुलोत्तंस वीररुद्र जगत्त्रये पुत्रितां धुरमेषोहं पुत्रेरागारोपितत्त्वया। अत्र प्रेमरूपभाववाशास्वामिन्नृतानेति

वाक्यवृत्तिः। अथ संमितत्वं। यावदर्थपदत्वं तु संमितत्वमुदाहृतं॥ यथा। काकतीयनरेंद्रस्य यशश्चंदनचर्चने। दिगंगनाविमत्वं
तिवतंसीकृतनतजुराणः। अथ प्रौढिः। प्रौढिस्सुक्तेः परिपाकः। यथा। श्रीप्रतापभूप भ्रमवस्य चंद्रमुकुटस्याद्भुतैः राज्ये उत्तं दैत्यारेः प्र
तिबिंबनं सुरगिरेरिंदोः समुन्नेजनं। कर्णादेः पुनरुद्भवः सुरतरोः सर्वस्वमाविष्क्रियाः सर्वधेनोरिति तर्कयंति कवयः श्रीवीररुद्रं न्न
पं। अथ रीतिः। पथोपक्रमनिर्वाहो रीतिरित्यभिधीयते। यथा। बहुराणास्सेवते राजा यद्गुणैर्नवमन्यते। भट्टर्शीनान्युपादत्ते यद्गुला
निचवीक्षते। अथोक्तिः। विदग्धभणितिर्या स्यादुक्तिं तां कवयो विदुः। यथा। दि. कृतकमलावासभूरिः मो तु ह सुहस्त्र विनत
वृतिश्रेः सभा भासं ताे विलुमं कुवलयदलच्छीयसा दृष्टिः। अथ गतिः। गतिर्नाम स्वरारोहावरोहक्रमः। यथा। प्रकाशये त्वं
त्रैलोक्यं सततमतुलैः काकतिविभो महोभिर्विसीमैर्दिनकरकराटोपपटुभिः। तमः कांत्सेशानज्वलदनलरोचिः परिचयद
दृष्टाकमलानासोक्तिं राजन्स्तवसुखदं चरितस्य। भासं तमपि त्वां कुवलयलक्ष्मीः प्रसादयति॥ ३

=चित्र=

53 यत्त्वप्युद्वेलत्स्वरितपमनः त्वेवसन्ततं। अत्र सर्वार्द्धेंदीर्घाक्षरप्रायत्वात्स्वरस्यारोहः। एतेषां गुणानामर्थगतत्वमपि केचिदिच्छंति। प्रा
चामाचार्याणां मतेन संघटनाश्रयत्वमपि गुणानां। तदुक्तमलंकारसर्वस्वे। संघटनाधर्मत्वेन शब्दार्थधर्मत्वेन गुणालंकाराणां व्यव
स्थानमिति। अत्र नैव भंग्या गुणालंकाराणां सुनिरूपः स्वरूपभेदः। अन्यथा स्वरूपभेदस्य दुर्निरूपत्वात्। काव्यशोभाकरत्वमेव गु
णालंकारस्वरूपमुक्तं रुद्रदेवेन। शोभाहेतुः काव्यशोभायाः सोऽलंकारः प्रकीर्त्तितः। गुणोऽपि तादृशो ज्ञेयो दोषः स्यात्तद्विपर्यय इति॥
अतो गुणानां संघटनाश्रयत्वमेवयुक्तं॥ ॥इति गुणप्रकरणं॥ ॥अथ गुणनिरूपणानंतरमलंकारान्निरूपयंतो अ
लंक्रियतेऽनेनेति वा हृद्यहेतुरलंकारः। तदुक्तं काव्यप्रकाशे। उपकुर्वंति संतं येऽङ्गद्वारेण संश्रिताः। हारादिवदलंकारास्तेऽनु
प्रासोपमादय इति। यथा करचरणाद्यवयवगतैर्वलयनूपुरादिभिस्तदलंकारतया मासि हैरवयव्येवालंक्रियते तथैव शब्दा शिव

र्थावयवगतैरनुप्रासोपमादिभिस्तदलंकारतयाप्रसिद्धैरवयविभूतंकाव्यमुपस्क्रियते॰ आश्रयाश्रयिभेदेनालंकार्या
लंकारभावो लोकवत्काव्येसंमतः। चारुत्वहेतुत्वेपिगुणानामलंकाराणांचाश्रयभेदादेवव्यवहारः। तद्यदनाश्रयागुणाः।
शब्दार्थाश्रयास्त्वलंकाराः। तत्रप्रथमंशब्दार्थगतत्वेनद्वैविध्यमलंकारस्य॰ अर्थालंकाराणांचातुर्विध्यं॰ केचित्प्रतीयमान
वस्तवः। केचित्प्रतीयमानौपम्याः। केचित्प्रतीयमानरसभावोदयाः। केचित्स्फुटप्रतीयमाना इति॰ समासोक्तिपर्यायोक्त्या
क्षेपव्याजस्तुत्युपमेयोपमानन्वयातिशयोक्तिपरिकराप्रस्तुतप्रशंसानुक्तनिमित्तविशेषो। क्तिप्रभृतीयमानंवस्तुका
व्योपस्कारतामुपपाति। रूपकपरिणामसंदेहभ्रान्तिमदुल्लेखापह्नवोत्प्रेक्षास्मरणातुल्ययोगितादीपकप्रतिवस्तूपमा
दृष्टान्तसहोक्तिव्यतिरेकनिदर्शनाभेदप्रधानौपम्यंगम्यते। रसवत्प्रेयऊर्जस्विसमाहितभावोदयभावशबलतास्तुरसभावा

54 दिव्यज्यते। उपमानविनोक्त्यर्थान्तरन्यासविरोधविभावनोक्तनिमित्तविशेषोक्तिविषमसमविचित्राधिकान्योन्यकारणमा
लैकावलिव्याघातमालादीपककाव्यलिंगानुमानसारयथासंख्यार्थापत्तिपर्यायपरिवृत्तिपरिसंख्याविकल्पसमुच्चय
समाधिप्रत्यनीकप्रतीपविशेषमीलनसामान्यासंगतितद्गुणातद्गुणव्याजोक्तिवक्रोक्तिस्वभावोक्तिभाविकोदात्तेषु सह
दयहृदयाह्लादित्वं प्रतीयमानं नास्ति। अत्रैतेषु मध्ये कारकक्ष्याविभागः। साधर्म्यं त्रिविधं भेदप्रधानमभेदप्रधानं भेदा
भेदप्रधानं चेति। उपमानोपमेययोः स्वतो भिन्नत्वाद्भेदस्तत्र वास्तवः रूपकसंदेहपरिणामभ्रांतिमदुल्लेखापन्हुत्या
नामभेदप्रधानसाधर्म्यनिबंधनत्वं दीपकतुल्ययोगितानिदर्शनादृष्टांतप्रतिवस्तूपमासहोक्तिप्रतीपव्यतिरेकाभेदप्र शिव
धानसाधर्म्यनिबंधनाः। उपमानन्वयोपमेयोपमास्मरणानां भेदाभेदसाधारणसाधर्म्यमूलता। उत्प्रेक्षातिशयोक्त्योर

ध्यवसायमूले। विभावनाविशेषोक्तिविषमविचित्रासंगत्यन्योन्यव्याघाताततद्गुणाभावेकविशेषाणां विरोधमूलता।
यथासंख्यपरिसंख्यार्थापत्तिविकल्पसमुच्चयानां वाक्यन्यायमूलता। परिवृत्तिप्रत्यनीकतद्गुणसमाधिसमस्वभावो
क्त्युदात्तविनोक्तिपर्यायोक्तलोकव्यवहारमूलाः। काव्यलिंगानुमानार्थांतरन्यासास्तर्कन्यायमूलाः। कारणमालैकावलीमाला
दीपकसाराः शृंखलाभिधे वैचित्र्यमूलाः। व्याजोक्तिवक्रोक्तिमीलनान्यपह्नवमूलानि। समासोक्तिपरिकरौ विशेषणवैचित्र्यमू
लौ। अत्रालंकाराणां परस्परवैलक्षण्यं निरूप्यते। आरोपगर्भेष्वारोप्यमाणस्य प्रकृतोपयोगानुपयोगाभ्यां परिणाम
रूपकयोर्वैलक्षण्यं। आरोपविषयस्यारोप्यमाणरूपसंभवासंभवाभ्यामुल्लेखरूपकयोर्भेदः। आरोपविषयसंदेहभ्रां
त्यपह्नवैः संदेहभ्रांतिमदपह्नवानां परस्परभेदः। साधर्म्यमूलत्वेपि तुल्ययोगितादीपकनिदर्शनाव्यतिरेकदृष्टांतेभ्यः।

साधर्म्यस्य वाच्यत्वादुपमानन्वयोपमेयोपमा अभिधीयंते। साधारणधर्मस्य वाच्यत्वगम्यत्वाभ्यामुपमेयोपमाप्रतिवस्तूपमयो
र्भेदः। प्रतिवस्तु। बिंबप्रतिबिंबभावाभावाभ्यां प्रतिवस्तूपमादृष्टांतयोर्भेदः। प्रस्तुताप्रस्तुतव्यस्तत्वसमस्तत्वाभ्यां तुल्ययोगितादीप
कयोर्भेदः। उपमानस्य प्रसिद्धताप्रसिद्धताभ्यामुपमोत्प्रेक्षयोर्भेदः। अर्थमात्रशब्दसाम्याभ्यामुपमाश्लेषयोर्भेदः। उपमा
नोपमेयपर्यायभेदाभेदाभ्यामुपमानन्वययोर्भेदः। उपमानोपमेयभावस्य पर्याययौगपद्याभ्यामुपमेयोपमेयोपमयोर्भे
दः। अप्रस्तुतस्य वाच्यत्वगम्यत्वाभ्यामप्रस्तुतप्रशंसासमासोक्त्योर्भेदः। वाच्यव्यंग्ययोरुभयोः प्रस्तुतत्वे पर्यायोक्तिः। वाच्य
स्याप्रस्तुतत्वे अप्रस्तुतप्रशंसा। व्याप्तिपक्षधर्मताद्यभावात्काव्यलिंगस्यानुमानाद्भेदः। साधारणगुणयोगाद्भेदानुपल
ब्धौ सामान्यं। उत्कृष्टगुणयोगाद्भेदानुपलब्धौ समनं। उत्कृष्टगुणयोगान्न्यूनगुणतिरोधाने निमीलनं। अत्र मन्त्रव्यवच्छेदे

शिव

तात्पर्यभावादुदात्तालंकारस्वरूपसंख्यातो भेदः। काकतालीयतया कार्यसाधने कारणांतरोपनिपाते समाधिः। अहमु
हमिकया कार्यसाधने बहूनां कारणानामुपादाने द्वितीयसमुच्चयः। निन्हवस्य वाच्यत्वगम्यत्वाभ्यामपन्हवव्याजस्तुत्योर्भे
दः। अन्येषां भेदः स्पष्ट एव। यद्यपि व्याजोक्तिमीलनसामान्यपृथक्कथंचित्सादृश्यमस्ति तथाप्यविवक्षितत्वान्नसादृश्यमू
लेषु गणना ॥ छ ॥ अथालंकारस्वरूपविभागानंतरं शब्दार्थयोर्मध्ये शब्दस्य प्रतीत्यंतरंगत्वात्प्रथमं शब्दालंकारा निरूप्यं
ते। अभेदव्यवधानेन द्वयोर्व्यंजनयुग्मयोः। आवृत्तिर्यत्र स बुधैश्छेकानुप्रास इष्यते। पंचाव्यवहितयोर्व्यंजनयुग्मयोर्द्व
योः पौनरुक्त्यं तत्र छेकानुप्रासः। यथा। महीमहीनविभवेषु ते क्षमेमकरेकरे। राजन्नविजयी राजा राजहंसोदयः। एकद्विप्र जन्य
भृतीनां तु व्यंजनानां यदा भवेत्। पुनरुक्तिरसौ नाम वृत्त्यनुप्रास इष्यते। यथा। रेरे स्तब्धमहीक्षितः स्मरणमितः श्रीकीर्ति क

पृ

58 क्ष्मापते वीक्ष्य युद्धं ध्वजिनीं दुरीक्षां सुभटं प्रोक्षिप्त कौक्षेयकैः। योत्स्यद्धं पदिलम्यमक्षस्य पदं कांतारवक्षोहृथाः क्ष्माभृत्कक्ष
चरत्तरक्षुनिकरा त्वत्रात्मरक्षाकृतः। यमकं पौनरुक्त्ये तु स्वरव्यंजनयुग्मयोः। छेकानुप्रासवद्यमनुप्रासे च स्वरपौनरुक्त्यमा
स नुषंगिकं। यमके तु स्वरव्यंजनयुग्मयोरावृत्तिः। तस्यादिमध्यांतगतत्वेन बहवो भेदाः। तत्र दिङ्मात्रमुदाह्रियते। प्रतापः काकती
न्द्रस्य महामहिमतेजसः॥ क्षिपयद्धातिपद्मेव महामहिमतेजसः। पत्रार्थः प्रभुरेव किंचिद्भासते पुनरुक्तवत्। पुनरुक्तव
दाभासः सोलंकारः सतां मतः। पत्रार्थः पुनरुक्तवदाभासते अन्वये पर्यवसानापायथा भवति स पुनरुक्तवदाभासः। अर्थालं
कारत्वेप्यस्य शब्दपौनरुक्त्याश्रितत्वाच्छब्दालंकारमध्ये लक्षणं कृतं। यथा। जिष्णुरिन्द्रः क्षितिभुजां श्रीपतिः शिव
पुरुषोत्तमः। भास्वान्सर्पिस्फुरत्तेजाः काकतीन्द्रो विराजते॥ अर्थपौनरुक्त्याभावादलंकारः कथ्यते। शब्दार्थयोः पौन

रुक्तत्वं वचनतात्पर्यभेदवतां सकृत् । अतात्पर्यविदां लाटानुप्रास इष्यते । पुनरुक्तार्थयोस्तात्पर्यभेदमात्रेण स्वरूपभेदस्तत्र लाटा
नुप्रासः । यथा । गुणानुरागास्त्रिजगत्पते ये हृद्बन्धमावेशिताः । नीतिर्नीतिरसौ तस्य लक्ष्मीर्लक्ष्मीश्च गीयते । पद्माद्याकारहेतु
त्वे वर्णानां चित्रमिष्यते । आदिग्रहणात् चक्रबंधादयः । तत्राष्टदलपद्मबंधो यथा । भातापस्वासमममानतिमिहकनको
स्थानसत्कासनापापानासत्कासमनस्थातु रवपनकमलाभ्यासमनुज्ञानमापा । पामनानज्ञानुसमभ्या । सितिपत्तितिलकं
ज्ञातिरिक्तासगेपापापागे सत्कारतिज्ञासुकृतिशुकूलितज्ञामस स्वापतापा । चक्रबंधो यथा । लक्ष्मीर्धीर्दिनवैभवस्य जग
तीनाथस्य भद्रश्रियो दिक्चारद्गु निजप्रतापजनितां भाति द्युरीप घ्नतः । नित्यं रुद्रजनाधिपस्य जयिनो भाति प्रकाशश्रिया
राजस्यालचनमोविताम्मनिभुजे पौगपाश्रितत्वाहृतां ॥ अत्र वैद्यनाथकृतिर्वीररुद्रयशः इति प्रतीयते । नागबंधो यथा ॥

ओजस्येरुद्वदेवे विभवतिमहिमव्याजितास्यप्रतापे विद्यावर्यैर्भिनेतर्पुरुहरिचरितैर्विभ्रुविस्तारभाजि । वैरिव्रातानात्तभंतेव
57 नमतितितिनरव्यातपो वैदेहविहृबवन्यैरसमवारिक्षितिमतिविविधेजंतुभिः स्थानभाजं ॥ ॥ इति शब्दालंकाराः ॥ ॥
अथार्थालंकाराः । तत्र प्रथममनेकालंकारबीजभूतत्वादुपमा निरूप्यते । स्वतः सिद्धेन भिन्नेन संमतेन च धर्मतः । साम्यमन्येन
हृदय वर्ण्यस्य वाच्यं चेदेकदोपमा । अत्र स्वतः सिद्धेन स्वतो भिन्नेन संमतेनाप्रकृतेन प्रकृतस्य धर्मतः साम्यमेकदा वाच्यं चेद्
भवति तत्रोपमा । स्वतः सिद्धेनेत्यनेनोत्प्रेक्षाव्यावृत्तिः । उत्प्रेक्षायामप्रसिद्धस्याप्युपमानस्य संभवात् । स्वतो भिन्नेनेत्यनेनानन्व
यव्यावृत्तिः । अनन्वये एकस्यैवोपमानोपमेयत्वसंभवात् । संमतेनेत्यनेन न्यूनोपमानादिव्यावृत्तिः । उदन्वानिव गंभीरः सुवर्णाद्रि १।८
रिवोन्नतः । दिङ्गः हेभइव क्षोणीधौरेयः काकतीश्वरः ॥ अत्र सुवर्णाद्रिसमुद्रदिङ्गजानामुपमानत्वं गम्यमित्युपमेये धर्मि

त इत्यनेन श्लेषालंकारवैषम्यं· तथाहि।नीराजयंत्यंबुपुरीत्यादि· अत्र मतापकृद्दूंपुरस्त्रियो नीराजयंति मेरुं रज इवेति नो
पमा·गोत्रपतिमिति विशेषणार्थस्य साम्याभावात्· राजपक्षे गोत्रशब्देन कुलमुच्यत इति· मेरुपक्षे गोत्रशब्देन पर्वत
मतीतिः।तथा·चंद्राननाइति स्त्रीपक्षे चंद्र इवाननं यासामिति समासः।रात्रिपक्षे चंद्र एवाननमिति शब्दमात्रसाम्येनो
पमाप्राप्तिः।किंतु श्लेष एव· अनेन वर्ण्यस्य साम्यमिष्यनेन प्रतीपालंकारो व्यावर्त्यते।तथाहि।लोकोपमविशेषस्तः किंतु
मेः कस्य कथ्यते।पक्षाकृतिनरेंद्रे राजसु मेरुरुपमीयते।अत्राप्रकृतस्य मेरोः प्रकृतेन राज्ञा सादृश्यमिति प्रतीपालंका
रेणोपमा।एकदा साम्यमित्यनेनोपमेयोपमाव्यवच्छेदः।तथाहि।धर्मोर्थ इव पूर्णाश्रीरर्थो धर्म इव त्वयि।तः।कामस्ता वि
वत्तो काम इव हृद्दनरेश्वरे।अत्र धर्मोर्थ इव अर्थो धर्म इवेत्यनेन एकदा इव शब्दद्वयेन धर्मार्थकामानां सादृश्य प्रतिपादन

58 रुपमेयोपमा। वाच्यमित्यनेन प्रतीयमानौपम्यानां रूपकपरिणामभ्रांतिमदुल्लेखापन्हुत्यप्रयोगितादीपकप्रतिवस्तूप
माद्दृष्टांतसहोक्तिव्यतिरेकनिदर्शनानां वैलक्षण्यं। तथाहि। प्रतापरुद्रनृपते मंडलाग्रविधुंतुदः। अखंडविक्रमोद्दा
मो ग्रसते राजमंडलं। अत्र मंडलाग्रविधुंतुदयोः सामानाधिकरण्यप्रयोगान्यथानुपपत्त्या सादृश्यं लक्ष्यत इति नोपमा
किंतु रूपकालंकारः। तथाहि। शश्वत्प्रसाधनविधानकृताभिलाषान्मन्ये भुजं तिमकुटेरवनीशवर्गाः। श्रीवीररुद्रनृप
तेः ककुभां विजेतुराज्ञामयीं स्रजममंदविलासलक्ष्मीं। अत्रारोपविषये प्रकृतोपयोगित्वेनारोप्यं परिणमते न तस्य
न्यथानुपपत्त्या सादृश्यं प्रतीयत इति नोपमा किंतु परिणामः। किमेष नवमो हरिस्त्यतिरमंदसंपत्पदं किमेष नवमः प्रजाप शिव
तिरपूर्वसर्गक्रमः। किमेष हरिरूर्वरोद्धरणचंचुरेकादशश्चिरादिति विलोक्यते जगति काकतीन्द्रो जनैः। अत्र काकतीन्द्र

दिगीश्वरादीनां परस्परभेदे प्रतीते संदेहनिबंधनान्यथानुपपत्त्या सादृश्यमाक्षिप्यते तेनन: संदेहालंकार:। काकतीपविभोः
कीर्तिं विभवे व्यासरोरुहसि। दिवापि चंद्रिकाबुद्ध्या चकोरा पांति। निद्रेति। अत्र कीर्तिविभवे चंद्रिकाबुद्धिश्चंद्रिकासादृश्यं वि
नानसंभवतीति सादृश्याक्षेपोऽत्रो। तिमदलंकारः। लक्ष्मीनिवासगृहमित्य विलानरेंद्राः शौर्याति भ्रमि रवनिरित्यरिवीरवर्गः। दि
घाविहारवन्नभीतिचलत्तुवर्णाः श्रीकाकतीपनगरीमनिशं स्तुवंति। अत्र नगर्यां तत्पदार्थारोपः सादृश्यं विना न संभवतीति
सादृश्यस्य कल्पनादुल्लेखालंकारः। तथा च। वीररुद्रस्य भूपालजयप्रहोमं वितन्वतः। धूमरेखाउ रिपुर्भाति न च भ्रमरेपुरुत्थि-
ता। अत्रोत्थितां च भ्रमरेपुमवलोक्य अक्षमपट्टि। रत्नपन्हवेनारोपः सादृश्यमूलएवेति सादृश्याक्षेपः। एवं तुल्ययोगितादिष्व
पि सादृश्यस्य गम्यत्वात्तोपमाशंका। न ॥ तत्सर्वेभ्यः सादृश्य रूपमूलेभ्योऽचितत्वात्तोपमुपमा॥ ॥सा प्रथमं द्वि

५१ धा॰ पूर्णा लुप्ता चेति॰ उपमानोपमेयसाधारणधर्मसादृश्यप्रतिपादकानां प्रयोगे पूर्णा। एकस्य द्वयोस्त्रयाणां वा लोपे लुप्ता॰ पू
र्णा द्विधा॰ श्रौती आर्थी चेति। साक्षात्सादृश्यप्रतिपादकयथेवादिप्रयोगे श्रौती। धर्मिव्यवधानेन सादृश्यप्रतिपादकानां सदृ
शसंकाशनीकाशप्रकाशादिशब्दानां प्रयोगे आर्थी। द्वे वाक्यतद्धितसमासगतत्वेन त्रिविधे॰ एवं पूर्णोपमा षट्प्रकारा॰ लु
प्तोपमैवैकविंशतिभेदा॰ तेन तुल्यं क्रिया चेद्वतिरिति वतेरुपादाने आर्थी। तत्र तस्येवेति इवार्थे विहितस्य वतेरुपादाने श्रौती।
अतएव सादृश्यार्थे विहितस्य वतेः प्रयोगे धर्मोपादानेनानन्वय सोऽकुमार्यादनुक्तधर्मतद्धितगा श्रौती लुप्ता नास्ति कल्पबा
दिप्रयोगे चार्थ्येव॰ तथा उदाहरणानि। वाक्यगा पूर्णा श्रौती यथा। उद्दामोद्यतविक्रमेकतपगेबाहोयपानेयथात्रेतायां र शिव
घुनायकस्य महितस्ख्यातो भुजायां यथा। दोर्दण्डे थ पुपिछिरस्य विजेसछेद्ये यथा द्वापरे। विस्वब्राघकलौ नरथैवरमते स्सोरार्धे

ध्रभर्त्तुर्भुजे। समासगापूर्णाश्रौती यथा। भास्वानिवोद्यन्नुदयाद्रिलंबीमद्वासनस्थो वरवीररुद्रः। उत्सस्पतामभ्रपुरीज
नानां नेत्राब्जजातं शमपेतमशेषं। अत्र भास्वानिवेतीवेनानिसमासः। तद्धितगापूर्णाश्रौती यथा। कूर्मवच्छेषवद्दोत्रगिरी
वद्दिर्द्ध हेमवत्स्मितौ यहद्द्विस्मभुजे धुरीणा भातिमेदिनी। वाक्यगापूर्णा-आर्थी यथा। तेस्तैर्महीजालनसौविधानैस्तैस्तैः म
जार्रं जनं वैभवैर्भृशं। विराजते सं प्रतिकाकुतीयलक्ष्मीपातिदीशरथ्थे। समानःसमासगापूर्णा आर्थी यथा। ताहृक्रमालन
सामूर्थ्यसंपदा काकुतीश्वरः। हरिदीश्वरसंकाशः शास्ति मध्यमविष्टपं। तद्धितगापूर्णा आर्थीयथा। हेमाचलवद्दोत्रन्येगां
दाहरणेषु भीर्येक्षीरसिंधुवत्। प्रतापे भानुवद्भाति काकुतीयनरेश्वरः। येषूपमानोपमेयसाधारणधर्मसौदृश्यप्रतिपादकानी
तिपूर्णात्वं। अत्रानुक्तोपमापाउदाहरणानि। अ[redacted]नुक्तधर्मेवाक्यगाश्रौतीलुप्ता यथा। यथा मिव सादिनि वंधना

60

यु
रुचां स्वामिनि चक्रवाकस्येव यथा। वनीहाररुचौ वकोकिलः ध्याप्रसन्नस्तवकेश्वमर्यस्तथा प्रजाः काकतिवीररुद्रे ॥ अनुक्तधर्मा
समासगा श्रौती लुप्ता यथा। प्रतापरुद्रदेवस्य पादपीठमनारतं। आराधयन्ति भूपालाः प्रशान्ता देवतामिव ॥ अनुक्तधर्मा वा
क्यगा आर्थी लुप्ता यथा। काकतिक्ष्मापतेर्जैत्रप्रयाणपटहध्वनिं। तुल्यं दंभोलिनिर्घोषैः श्रुत्वा वंशमहीभृतः ॥ अनुक्तधर्मा
समासगा आर्थी लुप्ता यथा। शम्भुस्तुरीये काशीत्याभिधानो वसत्यैकसारासहर्षी मदेक्ष्यानमंतिमपानु विकाकतीनीपराज्यमति
छोबहुमन्यमानाः ॥ अनुक्तधर्मा वहितगा आर्थी लुप्ता यथा। प्रतापरुद्र नृपते जगन्मोहिततेजसः। कंदर्पकल्पमाचारं पश्यन्ति
भूपुरंध्रयः ॥ अनुक्तधर्मेवादिः कर्मक्यचा लुप्ता यथा। दुग्धार्णवीयन्तं मौक्तीकैः नासीपतिपर्वतान्। प्रतापरुद्रदेवस्य यशो
वैशद्यवैभवं ॥ अनुक्तधर्मेवादिराधारक्यचा लुप्ता यथा। क्रीडाद्रीयति हेमगोत्रशिखरिस्त्वरेखास्थानपद्मीयति द्वीपव शिव

त्रिपुरद्रीर्घिकीपतिहरिस्त्रैकांतगेहीयति।ऽउघानीयतिसीमपर्वततटारराणे सुपर्वाचले प्रासादीयति वीररुद्रन्त्रपतेः स्फारःप्र
तापोद्दयः।अनुक्तधर्मैवादिः कर्मणामुल्लासुमापया।पश्यंत्यात्मजदर्शमिंदुममस्त्रोतस्विनीवत्स रोदंशंक्षीरपयोनि
धिंप्रियसुहृद्दर्शगिरिराजं तां।लीलादर्पणतादर्शमिन्वदमच्छताराच्छहारावलीदर्शरिचेत्तति वीररुद्रनृपतेः कीर्तिर्जगद्व्यापिनी।
अनुक्तधर्मैवादिः कर्तृणामुल्लासुमापया।न्यपेषु शिक्षापरदंडेचापैरकांतासुपुष्पायुधधन्वावारं प्रजासुवात्सल्यबनपाधि
चारं वरसमपरुद्रन्त्रपेद्रवजुः।अनुक्तधर्मैवादिः।क्रियाल्लुसमापया। सुधाप्रवाह तिसतामसतां कालकूट ति।वीररुद्रनृपे
द्रस्य गुरुणाज्योत्स्ना विर्जितामे मिता।अनुक्तधर्मैवादिः।कर्तृक्यचालुसमापया।ज्योत्स्नीयति सुधीयंति चंदनीयति सर्वतः।
प्रतापरुद्रन्त्रपतेः प्रसर्गाःकीर्तिमहोमयः।अक्रीतीनां स्वरूपमुपमेया।अनुक्तधर्मैवादिः क्यङालुमापया।शेषायतेम

61 ह्रीबेरुं कल्पशाखायते र्थिनां प्रतापरुद्रदेवेंद्रः कालदंडायते द्विषां। अनुक्तोपमेयावाक्यगालुप्तायथा। वदान्यो नान्यो
नान्योऽस्तीत्यादि। अनुक्तोपमेयासमासगालुप्तायथा। वीररुद्रसमो भूप। राजा नास्ति नास्त्येव भूतले पस्य धर्मानुबंधेन
कलिः कृतयुगीकृतः। अनुक्तधर्मोपमेवावाक्यगालुप्तायथा। लोके काकतिवीररुद्रनृपते हारं भवत्कीर्तयः कीर्त्या का
र्तिकचौमुदीधवलनात्तुल्येन किंचित्क्वचित्तायन्माधुर्यविजृंभितैः क्षतविधांगनीवाविलोक्याधुनाकंठालिंगनमीरि
तुर्विंतनुते नीरं भ्रमद्देःसुना। अनुक्तधर्मोपमेयासमासगालुप्तायथा। प्रतापरुद्रतुल्यं क्वचिदपि न भूतं न च भवन्नमावि
त्रैलोक्यकृतमपिजल्पिनः काकतिविभोः प्रकाशोद्भुतपत्तिर्भुवनमरितैर्यस्य लक्ष्मितैरस्तं पंपश्यानामवधिगिरिपाश्चात्यह शिव
षदां। अनुक्तेवादिः समासगालुप्तायथा। काकतीन्द्रोऽरसो भाति भीमसेन पराक्रमः। किं हृदुःशासनाः सर्वे पस्य प्रत्यर्थि

पार्थिवाः॥ एवमेतदन्तरं यथा तं मम समुदाहार्यं। एकस्यैवोपमानोपमेयत्वेनान्वयो मतः॥ यत्र द्वितीयसब्रह्मचारिनिवृत्त्यर्थमेक
स्यैवोपमानोपमेयभावो निबध्यते॥ सोऽनन्वयालङ्कारः। सन्तु लोकेषु वराणि रत्नाकरसुधाकराः। तथापि वीररुद्रोऽयं वीर
रुद्र इव स्वयं। पर्यायेण द्वयोस्तस्मिन्नुपमेयोपमामता। तस्मिन्द्वित्रिषु उपमानोपमेयप्रत्यवमर्शः। यथा धर्मोऽर्थ इवेत्यादि॥
सदृशानुभवादन्यस्मृतिः स्मरणमुच्यते। यत्र सदृशस्य पदार्थस्यानुभवेन सदृशवस्त्वन्तरपरामर्शो जायते तत्र स्मर
रि णालङ्कारः। राज्ञा प्रतापरुद्रेण पालितेयं वसुन्धरा। स्वैरं इन्दुनलादीनां सा चास्मरति भूभुजां। अत्र नलनृपादिवस्या
लनप्रवीरात्तथा प्रतापरुद्रात्क्षितौ तां समासवत्याः मेदिन्याः पूर्वराजस्मरणं। भेदाभेदसाधारणसाधर्म्यनिदर्शनालङ्का
रा दर्शिताः॥ ॥सम्प्रत्यारोपगर्भालङ्कारप्रस्तावः॥ तत्रापि प्राधान्यात्प्रथमं रूपकं निरूप्यते॥ आरोपविषयस्य स्यादाने

रोहितरूपित्वात्। उपरंजकमारोप्यमाणं तद्रूपाकं मतं। अत्रारोपविषयस्यानिमग्नेनाध्यवसायगर्भस्योत्प्रेक्षादेरनारोपमूलाना
मुपमादीनां च व्यावृत्तिः। अतिरोहितरूपित्वादित्यनेन संदेहभ्रांतिमदपह्नुतीनां व्यावृत्तिः। संदेहालंकारे विषयस्य संदिह्यमा
नतया तिरोधानं भ्रांतिमदलंकारे भ्रांत्या विषयतिरोधानं। अपह्नुत्यलंकारे पह्नवेनारोपविषयतिरोधानं। उपरंजकमित्य
नेन परिणामालंकारस्य व्यावृत्तिः। परिणामे ह्यारोप्यमाणस्य प्रकृतोपयोगित्वेनान्वयो न प्रकृतेःपरंजकत्वेन। अतः सर्वेभ्यः
सादृश्यमूलेभ्यो विलक्षणं रूपकं। तस्य प्रथमं त्रैविध्यं। सावयवं निरवयवं परंपरितं चेति। सावयवं परंपरितं चेति। सावयवं द्विविधं स
मस्तवस्तुविषयमेकदेशवर्ति चेति। निरवयवं द्विविधं केवलं मालारूपं चेति। परंपरितस्यापि श्लिष्टनिबंधनत्वेनाश्लिष्टनिबंधन शिव
त्वेन द्वैविध्यं। तयोरपि प्रत्येकं केवलमालारूपतया चातुर्विध्यं। एवमष्टविधो रूपकालंकारः। आद्योदाहरणानि। यत्रावयवानामव

यविनभ्वसामस्त्येननिरूपणां निबध्यते तत्र समस्तवस्तुविषयं रूपकं॰ यथा॰ याञ्चाम्भा हविवीररुद्रन्नपते निःसाराधाराधरैर्वै
रिक्ष्मापतिगर्वपर्वतभिदाभीमं मुदुर्गर्जितिः शत्रुस्त्रीनयनांबुवृष्टिरसकृज्जातानयासर्वतोवर्धते हरिदंतरे भुजगद्दामं दाव
शः कंदलाः॥ यत्रावयवनिरूपणाद् अवयविनो निरूपणं गम्यते तदेकदेशवर्तिरूपकं॰ यथा॰ भ्रमात्विषाशावल्लयांतरालः शौर्याङ्कुरः
काकतिवीररुद्रः। विकस्वरैर्वीसनयान्त्रिलोकीं गुणगणं प्रसत्ते सुरभीकरोति॥ अत्रावयवानां गुणानां प्रसन्नेनिरूपणेन न्नपतेः
कल्पशाखित्वं निरूप्यते। तस्मादेकदेशवर्ति॰ यत्रावयविनिरूपणमात्रेकृविसरं भविश्रांतिः तन्निरवयवं रूपकं॰ अवय
विनिरूपणमात्रेपि तदेव॰ तन्केवलं यथा॰ प्राकारमविजं भमारासु मध्यक्ष्वेलितान्वेऽितेर्निःसाराध्वविभिः स्फुटप्रविदल
द्रोदः कटाहांतरैः। क्ष्वुद्वेष्य विषुकं पितेषुगिरिभुभृद्धैवमुंचंत्यसत्वभीताः काकतिवीररुद्रनृपते प्रत्यर्थिनः पार्थिवाः। अत्रनरे

63 दसः कटाहरूपत्वं निरूप्यते। माला निरवयवयथा। राज्ञीमौलिविभूषणास्त्रगमलादिक्कुंजरश्रोत्रयोःस्फारंचामरमभ्रष
रांधरतीभ्रछत्रंगेषुगंगासरित्। व्योम्नःक्षौमविताननुज्ज्वलमनतरंमुक्ताकलापोभुवःस्फारःकाकतिवीररुद्रयशसांजागर्ति
विस्फूर्जितं। रूपकहेतुरूपकंपरंपरितं। रूपकहेतुमात्रव्यवस्थितत्वादस्यानसमविषयेंतर्भावः। श्लिष्टकेपरंपरितंयथा। प्रतापवी
ररुद्रस्यमंडलाग्रविधुंतुदः। अखंडविक्रमोद्दामोऽस्तिसतेराजमंडले। श्लिष्टमालापरंपरितंयथा। पद्मोल्लाससहस्रभानुरस
हसत्क्ष्मामार्गेपथ्यविधुःक्ष्माभृत्पक्षभिदाशनिःकुवलयालंकारराकाशशी॥ नित्योद्यत्सुमनोविकारसुरभिःकाव्यारामसंपूत्सु
रक्षोराशीभदुवनाभ्रयोंबुक्षिरयंश्रीवीररुद्रोनृपः। श्लिष्टकेवलपरंपरितंयथा। काकतीयस्यदुग्धाब्धेर्यशोजीलामहोर्मे
यः। दिक्कूलं मुद्रुजाटोपाःखेलंतमन्तकषोद्धूपाः। अश्लिष्टमालापरंपरितंयथा। दोराशीविषाजिह्वयारिपुवनभ्रेशारिम शिव

हावाम्यया शौर्याग्नानलदेम माजयपरमाप्यो विद्विलासम्नुवा। संहृष्य हरणीविलासशिखिनीसंवासयष्टा जगत्मास्तादागि
त्नया हृपाराम्मतया हृदूनोन्वपः क्रीडति। अश्लिष्टमालापरंपरितं वैधर्म्यरणा पि संभवति। आसां क्षकार मध्यान्ताः केवल
नपरात्रयः। जयंति वीरे रुद्रस्य जयप्रांगणाके नवः एवमष्टविधस्या। पिवाक्यस्तमासगतत्वेन षोडश रूपकभेदाः संभवं
ति॥ ॥ आरोप्यमाणा आरोपविषयात्मतया स्थितं प्रकृतस्योपयोगि स्यात्परिणामकृद्दाहृतः। आरोप्यमाणं
प्रकृतोपयोगीत्वेनेन सर्वालंकारव्याहृत्तिः। ससमानाधिकरणपवैयधिकरण्याभ्यां द्विविधः। सामानाधिकरण्ये
न परिणामो यथा। शश्वत्वसाधनविधानकृताभिलाषान्नु मैत्रे भजेतिमकुटेरवनीपवर्गाः। श्रीवीररुद्रनृपतेः क
कुभां विजेतुराज्ञामयी स्रजममंदविलास लक्ष्मीः। वैयधिकरण्येन यथा। प्रतिभटविजयाय प्रस्थितस्याग्न

यायीप्रलयदहनरूक्षोवीररुद्रप्रतापः। समजनिभुजशौर्यैर्वर्धमैर्मे खड्गः सहायः समितिविहरतस्तेसा। श्रीरणवीरलक्ष्मीः॥
अनेनप्रतापभुजशौर्योदयः अयमभूत्श्रीयापिवर्मादिरूपेणापरिणमंतः शत्रुविजयहेतोः समरकालेउपयोगमुपगताः॥
किरीटमाणिक्यमयूखजालैर्विधायपुष्पांजलिमर्चयंते। कैलासशायाहरुद्रनरेंद्रपादपीठांतसीमानमरिक्षितीशाः॥ समा
सोत्कावारोव्यमाराध्यप्रकृतोपयोगेप्यवाच्यत्वान्नपरिणमंतमर्थः॥ ॥विषयोविषयीयत्रसादृश्यात्कोविसंमतात्।
संदेहगोचरोस्मात्तांसंदेहालंकृतिंश्रुताः॥ सात्रिधाशुद्धानिश्चयगर्भानिश्चयांताचेतिसंदेहमात्रपर्यवसायिनीशुद्धा। यथा·
किमेषनवमोहेरिःस्यतिरिमादिः। निश्चयगर्भायथा· कालाहिःकिमयंप्रसारितनमद्दुर्लंभोगंसधत्तेपुनःकालभ्रूकुटिरेष शिव
किंनुमुखएवोज्जृंभतेसापुनः। कालोग्नानछलेध्रुमपद्धतिरसोकिंसापुनर्धूपतेवातेनेतिविकल्प्यतेप्रतिभटैरुद्रस्यकौ

क्षेपकः। निभृतपयर्वस्तानापथा। किं कल्पद्रुममंजरीत्वज इमे किंवापशोशशापः स्वर्धेनोरथवा। किमुज्ज्वलतराश्चिंतामरोः स्फू
र्त्तयः। किं वास्ति हरसोर्मपश्चिरमिति व्यामथ्य निश्चीन्वते संतः काकतिवीररुद्रनृपतेः सेमराः कटाक्षा इति॥ ॥ कविसेमतिसा
दृश्यपाद्विषये पिहितान्मनि॰ आरोप्यमाणानुभवोपत्रसम्भ्रांतिमान्मतः। कोकतीपविमोः कीर्त्तिरित्यादि। निषेध्यविषयं सा
म्यादन्यारोपे प्यपह्नुतिः। नस्मात्त्रिविध्यं॰ अपह्नुत्यारोप आरोप्यापह्नवछलादिशब्दैरसत्यत्वप्रतिपादनं च॰ आद्यद्यसो
दाहरतां॰ उद्वेजत्वन्तुररीवीकल्पकल्परस्मादि॰ [redacted] छलादिशब्दैरसत्यत्वप्र तिपादनं यथा॰ सर्वाकाकतिवीररुद्रधराधीशायछलेन क्षितिं पातुं मध्यमलोकपा
लपदवीप्राप्तः स्वयं भवः शिवः। नैवं चेद्विषमावलोकनकलामात्रे राभस्मीकृते जीत वैरिपुरैः कथं कथमवाग्जाते चमत्कृतो॥ ७२

65 अर्थयोगात्क्वचिच्छ्लेषे ऽश्लेषवन्नयनेकधा। महीतलभेदादेकस्य सउल्लेखः सतां मतः। अर्थयोगाद्यथा। लक्ष्मीरिवा सरसीहमि
पोथु स्यादि। श्लेषे यथा। उग्रः सपत्नेषु गुरुर्भास्वान्नरामः प्रतीकेषु रसेषु भीमः। लीलासु लक्ष्मणः पुरुषोत्तमश्च श्चावसते हृद्वन्त पंक
वीरः॥ ॥ अथाध्यवसायमूलमलंकारद्वयमुच्यते। विषयविषयिणोरन्तरनिगरणेनाभेदप्रतिपत्तिरध्यवसायः। स
द्विविधः। विषयिनिगरणेन विषयनिगरणेन च। पदार्थान्यधर्मसंबंधादन्यत्वेनोपतर्कितं प्रकृतं हि भवेत्प्राज्ञास्तामुत्प्रेक्षां
प्रचक्षते। यत्राप्रकृतगुणक्रियासंबंधात्प्रकृतत्वेनाप्रकृतस्य संभावनं सोत्प्रेक्षा। सा द्विविधा। वाच्या प्रतीयमाना च। संभाव
नाप्रतिपादकानां नूनं प्रायप्रमेवमादीनां प्रयोगे वाच्या। अप्रयोगे प्रतीयमाना। जातिक्रियागुणद्रव्याणां च तुर्णामध्यवसा शिव
यविषयत्वाद्द्विविधा प्रत्येकं चतुर्धा। तेषां भावाभावरूपतया द्वैविध्ये ष विधा अध्यवसायस्य गुणादिनिमित्तत्वेन क्रियापानिमि

त्त्वेन च द्वैविध्ये प्रत्येकं षोडश प्रकाराः। निमित्तस्य वाच्यत्वगम्यत्वाभ्यां द्वैविध्यं। वाच्योत्प्रेक्षायामेव प्रतीयमानोत्प्रेक्षाया
मपि वा धनुपादाने निमित्तस्य वा मध्ये गौडोत्प्रेक्षायां निरवलंबनत्वात्। तथा जात्यादीनां स्वरूपेण हेतुरूपेण फलरूपेण वाध्य
वसायविषयत्वेन द्विविधं। वाच्योत्प्रेक्षायामपि हेतुफलयोरुहोत्प्रेक्षाविषयत्वेन निमित्तस्योपादानमेव। तथा हि। साध्ये नुपा
त्ते साधनस्य न निर्देशो नाच्चपंपुष्पमातीति। तथा साधने नुपात्ते साध्यत्वेन निर्देशोपि तयोरन्योन्यापेक्षत्वात्। हेतूत्प्रेक्षायां फलं
निमित्तं तस्यानुपादाने कं प्रतिफलत्वेन संघटेत। तथा हि। प्रतापरुद्रनृपतेरपारे कीर्तिसागरे। मग्नादृशिं दुष्कीर्तिसंयोगादि
व जगत्त्रयी। अत्रोत्प्रेक्षानिमित्तस्य मज्जनस्यानुपादाने संगादिति हेतूत्प्रेक्षा न शोभामावहति। जयश्रीवासपद्मस्य
विकासापेक्षभानुमान्। प्रतिबिंबमिषात्त्वद्गुं प्रविशत्यंघ्रिमभुजः। इत्यत्रोत्प्रेक्षानिमित्तमुत्तमस्य भानुमतः खड्गप्रवेशस्यानु

66 पाशानेजपथ्वीकमलविकासायेति फलोत्प्रेक्षा समासमीचीनं· अतः स्वरूपोत्प्रेक्षायामेव निमित्तस्योपादानानुपादाना
भ्यां द्वैविध्यं· वाच्योत्प्रेक्षायां भेदगणना। उपात्तगुणक्रियानिमित्तजातिभावस्वरूपोत्प्रेक्षा· उपात्तक्रियानिमित्तजाति
स्वभावस्वरूपोत्प्रेक्षा· अनुपात्तनिमित्तजातिस्वभावस्वरूपोत्प्रेक्षा· उपात्तगुणनिमित्तजातिस्वभावहेतूत्प्रेक्षा। उपात्त
गुणनिमित्तजात्यभावहेतूत्प्रेक्षा· उपात्तक्रियानिमित्तजातिभावहेतूत्प्रेक्षा। उपात्तक्रियानिमित्तजात्यभावहेतूत्प्रेक्षा। उ
पात्तगुणनिमित्तजातिभावफलोत्प्रेक्षा। उपात्तगुणनिमित्तजात्यभावफलोत्प्रेक्षा। उपात्तक्रियाजातिनिमित्तभावफ
लोत्प्रेक्षा। उपात्तक्रियानिमित्तजात्यभावफलोत्प्रेक्षा। एवं चतुर्दशभेदा जात्युत्प्रेक्षा। अनेनक्रमेण गुणक्रियाद्रव्यो शिव
त्प्रेक्षापि परिगणनीया· एवं वाच्योत्प्रेक्षा पा·षट्पंचाशद्भेदाः। प्रतीयमानोत्प्रेक्षा त्वषट्चत्वारिंशद्भेदा। तत्र स्वरूपोत्प्रेक्षा

यामपि निमित्तोपादाननियमान्निमित्तस्यागम्यत्वे गुणरूपत्वेन क्रियारूपत्वेन चाहत्य विशेषाभावादेक एव भेदो गम्यते।
गुणक्रिययोरुत्प्रेक्षाविषयत्वमुत्प्रेक्षानिमित्तत्वं चाभ्युपगतं। प्राचामलंकारप्रबंधे। वपुषस्तवतिभेदोत्प्रेक्षेति गणनामा
त्रं चारुत्वातिशयस्तु प्रपंचाशात एव भेदानां॥ ॥तत्र यथासंभवमुदाहरणानि॥ उपात्तगुणनिमित्तजातिभाव
स्वरूपोत्प्रेक्षा यथा। कीर्तिः काकतिवीरहृद्रुन्नृपतेः सिंहासनाध्यासिनः प्राचां भूमिं जांघशः पिदधती कोटीन्दुतुल्यद्यु भु
तिः। रक्षादक्षिणराजलाभजनितामंदप्रमोदोच्छ्रिता त्रैलोक्याट्टहासप्रभेव ककुभां प्रांतेषु विद्योतते। अत्र प्रभा
शब्दो जातिवचनः। त्रैलोक्याट्टहासप्रभायाः कविप्रौढोक्तिसिद्धत्वान्नोपमाशंकावकाशः। उपात्तक्रियानिमि
त्तजातिभावस्वरूपोत्प्रेक्षा यथा। वीरस्य रुद्रनृपतेः प्रियवल्लभस्य राज्याभिषेकसलिलैः सरसीकृतापाः सद्यः समुद्

67 सितसांद्रपरागगौररवाक्षोणिपाः प्रसादपुलकांकुरमंजरीव। अत्र पुलकमंजरीवेत्युत्प्रेक्षायां सरसीकरणक्रियारूपं। अ
नुपात्तनिमित्तजातिभावस्वरूपोत्प्रेक्षा यथा। प्रतापरुद्रस्य नखेंदुकांतिः प्रणामभाजां पदयोर्नृपाणां। ललाटल
क्ष्माविधिनिर्मितायावर्णावलेर्दीपनदीपिकेव। अत्र दीपिकेवेति जातिवचनाज्जातिस्वरूपोत्प्रेक्ष्यते। उपात्तगुणनिमित्त
